# Sri Maha Rudra Shakti Yagnam and Koti Kum Kum Archana

## Hindu Temple Association of DE ; Sri Mahalakshmi Devasthanam

760 Yorklyn Rd, Hockessin DE-19707; (302) 235-5743
http://www.hindutemplede.com

**April 15 2016 to May 29 2016**

**DEVANAGARI/HINDI**







| | | |
|---|---|---|
| 1 | Poojakalpam | 1 |
| 2 | Sri Lalitha Sahasranamavali | 11 |
| 3 | Sri Lalitha Ashtotara Satanamavali | 22 |
| 4 | Sri MahaLakshmi Sahasranamavali | 23 |
| 5 | Sri MahaLakshmi Ashtotara Satanamavali | 32 |
| 6 | Sri Saraswati Sahasranamavali | 34 |
| 7 | Sri Saraswati Ashtotara Satanamavali | 43 |
| 8 | Sri Shivaashtottara Shatanamavali | 44 |
| 9 | Sri Lalitha Sahasranama Stotram | 45 |
| 10 | Maha Mangalarathi & Other Arathis | 51 |
| 11 | Mantra Pushpanjali | 55 |
| 12 | Main Arathis (Shiva, Rama, Krishna, Ganesha & Mahalakshmi) | 56 |
| 13 | Sri Vishnu Sahasranama Stotram | 58 |
| 14 | Sri Lakshmi Ashtottara Shatanama Stotram | 64 |
| 15 | Suprabhatam | 65 |
| 16 | Sri Mahalakshmi Ashtakam; Sri AshtaLakshmi Stotram | 70 |
| 17 | Sri Shiva Lingaashtakam | 71 |
| 18 | Kanakadhara Stotram | 72 |

# Sri MAHA RUDRA, SHAKTI YAGNAM and
# Koti Kum Kum Archana
# Program

## Opening Day, Friday, April 15, 2016

9:00am: Anujne Swastivachanam, Punyavaha Vachanam Sri. Maha Ganapati Pooja
9:30am: Deeksha vastra pradanam, yaga sala pravesam 10:00am: Sri. Ganapati Homam
10:30am: Sri. Lakshmi, Saraswati, Durga, Siva, Parvati Abhishekam, 12:0n: Arti
5:00pm: Ankurarpanam, 5:30pm: Shobha Yatra
6:30pm: Raksha Bhandan, 6:45pm: Maha sankalpam
**7:00pm:PRATHAMA(First) Maha Rudra , Shakti yagnam - Lakshmi Sahasranama archana and DEEPA POOJA**
8:00pm: Arti, Prasad

**= = =**

## Week Day Program (From April 18 to May 27,2016)

7:30am: Suprabhatam
8:00am **MAHA RUDRA,SHAKTI YAGNAM** - Devi Sahasranama archana and tarpanam (6 rounds)
8:30am: Sri. Rudra homam and Devi Homam (Purnahuti 9:30am)
9:30am: Ekadasa Rudraabhishekam
12:01pm Arti, Mantrapushpam
**12:30pm Annadanam**
5:00pm: **MAHA RUDRA,SHAKTI YAGNAM - Devi Sahasranama archana (2 rounds)**
6:00pm: Nitya Devata Pooja ,Satsang
6:15pm: **MAHA RUDRA,SHAKTI YAGNAM** - Suvasini pooja
6:20pm: **MAHA RUDRA,SHAKTI YAGNAM - SIVA ASHTOTHARA ARCHANA**
6:45pm: "KANAKA DHARA" **Stotra parayanam**
**6:55pm: MAHA RUDRA,SHAKTI YAGNAM - Devi Nitya pooja, Sahasranama archana**
8:00pm Arti, Annadanam

**= = =**

## Saturday and Sunday program

7:30am: Suprabhatam
8:00am: **MAHA RUDRA,SHAKTI YAGNAM - Devi** Sahasranama archana (2 rounds)
8:30am: Sri. Rudra homam and Devi Homam (Purnahuti 9:30am)
9:30 am: Kalasa Pooja
9:45am: **MAHA RUDRA,SHAKTI YAGNAM** - 251 Kalasa, Ekadasa Rudraabhishekam
**11:45am: MAHA RUDRA,SHAKTI YAGNAM - Devi Sahasranama archana**
**12**:31pm: Arti, Mantrapushpam, Annadanam
**2:00pm: MAHA RUDRA,SHAKTI YAGNAM - Devi Sahasranama archana (2 rounds)**
**3:00pm: Cultural program**
5:00pm: **MAHA RUDRA,SHAKTI YAGNAM** - DEVI Sahasranama Archana (2 rounds)
6:00pm: Nitya Devata Pooja ,Satsang
6:15pm: **MAHA RUDRA,SHAKTI YAGNAM** - Suvasini pooja
6:20pm: **MAHA RUDRA,SHAKTI YAGNAM -** SIVA **ASHTOTHARA ARCHANA**
6:45pm: **"KANAKA DHARA" STOTRA parayanam**
**6:55pm:MAHA RUDRA,SHAKTI YAGNAM- DEVI Sahasranama archana - with gana,nritya samarpanam**
8:00pm Arti, Annadanam

= = = =

**Gana Samarpanam : Every day, 6:55pm and 7;45pm**
**Nrutya Samarpanam Fri,Sat,Sun days :7:45pm**
**Lalitha kala seva Saturdays and Sundays: 11:00am:**

**= = =**

**MEGA CONCERTS: TBD**

**= = =**

Yes! We would like to be : [ ]COMMUNITY REP [ ]YOUNG COMMUNITY REP
[ ]OFFER GANAM/ NATYAM [ ] VOLUNTEER

NAME & E-mail id:

PHONE NUMBER:

## Poojakalpam

**श्री गुरुभ्योनमः, हरिः ओम् ॥**

**श्रीसूक्त/पुरुष सूक्त विधानेन श्री रुद्र सहित शक्तिस्वरूपा श्रीमहाकाळीमहालक्ष्मीमहासरस्वती पूजाकल्पम् ॥**

अथ शांति मंत्रः

ओं भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाग् सस्तनूभिः। व्यशेम देवहितं यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्‍र्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु।।
ओ० शांतिः शांतिः शांतिः।।

गुरु प्रार्थना

गुरु ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः। गुरुः साक्षात् परब्रह्म तस्मै श्री गुरवे नमः।।

पथा गुरोः पादन पूत गंधिना। गिरा गुरोः कीर्तन बंधुर श्रीया।।
हृदा गुरोः भावन पाविता सृजा। भवे दियं मे कविता प्रयात्रा।।

**अथ गणेश स्मरणं**

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

**दीपाराधनं**

दीपं ज्योतिःपरब्रह्म, दीपं सर्वतमोपहम् । दीपेन साध्यते सर्वं, संध्यादीपं नमोस्तुते ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतो पिवा । यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यन्तरश्शुचिः ॥

**आचमनं**

ओं केशवाय स्वाहा, ओं नारायणाय स्वाहा, ओं माधवाय स्वाहा
ओं गोविंदाय नमः, ओं विष्णवे नमः, ओं मधुसूदनाय नमः
ओं त्रिविक्रमायनमः, ओं वामनाय नमः, ओं श्रीधराय नमः
ओं हृषीकेशाय नमः, ओं पद्मनाभाय नमः, ओं दामोदराय नमः
ओं श्रीकृष्णाय नमः

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रि युगं स्मरामि ॥

अयं मुहूर्तः सुमुहूर्तोस्तु॥

**प्राणायामं कुर्यात्**

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ।
ओं तत्-सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात् ॥
ओं आपोज्योतीरसोमृतं ब्रह्म भूर्भुवस्वरोम् ॥

**संकल्पं कुर्यात् ।**

ओं ममोपात्त समस्त दुरितक्षयद्वारा , **श्री महालक्ष्मी** प्रीत्यर्थं
शुभे शोभने मुहूर्ते श्रीमहाविष्णोराज्ञया प्रवर्तमानस्य, आद्य ब्रह्मणो द्वितीये परार्धे
श्री श्वेत वाराह कल्पे वैवस्वत मन्वंतरे, अष्टाविंशति तमे कलियुगे, प्रथमपादे, रमणक वर्षे ऐन्द्र खण्डे
क्रौंच द्वीपे, अमेरिका देशे, डेलवेर् नदीतीरे अस्मिन् हिंदूदेवालये, **श्री महालक्ष्मी** सन्निधौ,
अस्मिन् वर्तमाने व्यावहारिके चांद्रमानेन प्रभवादि षष्ठि संवत्सराणां मध्ये श्री ...नाम संवत्सरे
आयने ... ऋतौ ...मासे ...पक्षे ...तिथौ ...वासरे ...नक्षत्रे एवं ग्रह गुण गण विशेषण विशिष्टायां
अस्यां शुभ तिथौ
श्रीमान् श्रीमतः गोत्रोद्भवस्य ...नामधेयस्य/नाम्याः
मम/अस्माकं सहकुटुंबानां क्षेम स्थैर्य धैर्य वीर्य विजय अभय आयुरारोग्य सर्वैश्वर्याभि
वृध्यर्थं, धर्मार्थ काममोक्ष चतुर्विध फल पुरुषार्थ सिद्ध्यर्थं, दीर्घसौमंगल्य प्राप्यर्थं,
पुत्र पौत्राभि वृद्ध्यर्थं, सकल विध मनोवांछाफल सिद्ध्यर्थं
श्री रुद्र सहित शक्तिस्वरूपा श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिका अनुग्रह सिद्ध्यर्थं, संकल्पित
कोटि कुंकुमार्चन यज्ञस्य अंगभूतं अद्य यथा संख्यक अर्चनाख्यं कर्म करिष्ये।
तदंगत्वेन श्रीसूक्त/पुरुषसूक्त विधानेन यावच्छक्ति ध्यानावाहनादि षोडशोपचारैः पूजां करिष्ये ॥

**तत्रादौ निर्विघ्नता सिध्यर्थं महागणपतिं प्रार्थयिष्ये**

अगजानन पद्मार्कं गजाननमहर्निशम् ।
अनेक दंतं भक्तानां एकदंतमुपास्महे ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णिकः ।
लंबोदरश्च विकटो विघ्नराजो गणाधिपः ॥
धूमकेतु र्गणाध्यक्षः भालचंद्रो गजाननः ।
वक्रतुंडः शूर्पकर्णो हेरंबः स्कंद पूर्वजः ॥

पुष्पैः पूजयामिः

| | | |
|---|---|---|
| ओं सुमुखाय नमः, | ओं एकदंताय नमः, | ओं कपिलाय नमः |
| ओं गजकर्णिकाय नमः, | ओं लंबोदराय नमः, | ओं विकटाय नमः |
| ओं विघ्नराजाय नमः, | ओं गणाधिपाय नमः, | ओं धूम्रकेतवे नमः |
| ओं गणाध्यक्षाय नमः, | ओं भालचंद्राय नमः, | ओं गजाननाय नमः, |

ओं वक्रतुंडाय नमः, ओं शूर्पकर्णाय नमः, ओं हेरंबाय नमः,
ओं स्कंद पूर्वजाय नमः

**सकलदेवताः स्मरामि**

ओं श्रीमन्महागणाधिपतये नमः
ओं श्री वाणीहिरण्यगर्भाभ्यां नमः
ओं श्री लक्ष्मीनारयणाभ्यां नमः
ओं श्री उमामहेश्वराभ्यां नमः
ओं श्री सीतारामाभ्यां नमः
ओं श्री राधाकृष्णाभ्यां नमः
ओं श्रीदेवी भूदेवी सहित श्री वेंकटेश्वराय नमः
ओं श्री रमा सहित सत्यनारायण स्वामिने नमः
ओं श्री वल्ली देवसेना समेत सुब्रह्मण्य स्वामिने नमः
ओं श्री हरिहर सुत अय्यप्प स्वामिने नमः
ओं श्री आदित्यादि नवग्रह देवताभ्यो नमः

**कलशाराधनम्**

कलशस्य मुखे विष्णुः कंठेरुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा ।
ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।
अंगैश्च सहिताः सर्वे कलशांबुसमाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।
आयांतु देवपूजार्थं दुरितक्षय कारकाः ॥
गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिंधु कावेरि जलेस्मिन् सन्निधिं कुरु ॥
कावेरी तुंगभद्रा च कृष्णवेणी च गौतमी ।
भागीरथी च विख्याताः पंच गंगाः प्रकीर्तिताः ॥
अस्मिन् कलशे सर्वाणि तीर्थान्यावाहयामि।
कलशोदकेन पूजाद्रव्याणि देवं आत्मानं च प्रोक्षेत् ॥

**ध्यानम्**

**श्री रुद्र ध्यानम्**

नमः शिवाभ्यां नवयौवनाभ्याम्
परस्पराश्लिष्ट वपुर्धराभ्याम्।
नगेंद्र कन्या वृषकेतनाभ्याम्
नमो नमः शंकर पार्वतीभ्याम्।।

**श्री लक्ष्मीध्यानम्**

पद्मासने पद्मकरे सर्वलोकैकपूजिते
नारायणप्रिये देवि सुप्रिता भव सर्वदा।
क्षीरोदार्णवसंभूते श्रीप्रदे कमलालये
सुस्थिरा भव मे गेहे सुरासुरनमस्कृते।।

**श्री सरस्वतीध्यानम्**

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि।
विद्यारंभं करिष्यामि सिद्धिर्भवतु मे सदा।।

**श्री ललिताध्यानम्**

चतुर्भुजे चन्द्रकळावतंसे कुचोन्नते कुंकुमरागशोणे।
पुंड्रेक्षुपाशांकुशपुष्पबाणहस्ते नमस्ते जगदेक मातः।।

**१. आवाहनम्_**

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥

ओं सहस्र शीर्षा पुरुषः । सहस्राक्ष स्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशांगुलम् ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः आवाहयामि ।

**२. आसनम्**

तां म आवह जातवेदो लक्ष्मी मनपगामिनीम्। यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहम् ।।

ओं पुरुष एवेदग्ं सर्वं। यद्भूतं यच्च भव्यं । उतामृतत्वस्येशानः। यदन्नेनातिरोहति ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः नवरत्नजडित हेमसिंहासनं समर्पयामि ।

**३._पाद्यम्**

अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् । श्रियं देवी मुपह्वये श्रीर्मादेवी जुषताम् ॥

एतावानस्य महिमा । अतोज्यायाग्ं श्च पूरुषः । पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः पादयोः पाद्यं समर्पयामि

**४._अर्घ्यम्**

कां सोस्मितां हिरण्य प्राकारा मार्द्रां ज्वलंतीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत् । साशनानशने अभि ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः हस्तयोरर्घ्यं समर्पयामि ।

**५. आचमनीयम्**

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोकेदेवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

तस्माद्विराडजायत । विराजो अधिपूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः मुखे आचमनीयं समर्पयामि ।

**६. मधुपर्कम्**

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः ।
तस्य फलानि तपसा नुदन्तु मायांतरायाश्च बाह्या अलक्ष्मीः ॥

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसंतो अस्यासीदाज्यं । ग्रीष्म इध्म श्शरद्धविः ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः मधुपर्कं समर्पयामि ।

**पंचामृत स्नानं**
**क्षीर स्नानं**

ओं अप्यायस्व समेतु ते विश्वत स्सोम वृष्णियम् । भवावाजस्य संगथे ॥
श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः क्षीरेण स्नपयामि ।

**दधिस्नानम्**

ओं दधिक्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रण आयूगंषि तारिषत् ॥
श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः दध्ना स्नपयामि ।

**आज्यस्नानम्**

ओं शुक्रमसि ज्योतिरसि तेजोसि देवोवः सवितो - त्पुना त्वच्छि द्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥
श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः आज्येन स्नपयामि ।

**मधुस्नानम्**

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वोषधीः ।

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः मधुना स्नपयामि ।

**शर्करा स्नानम्**

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतु नाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाङ् अदाभ्यः।।

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः शर्करया स्नपयामि।

**फलोदक स्नानम्**

याःफलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः। बृहस्पति प्रसूताः स्तानो मुंचंत्वंहसः।।

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः फलोदकेन स्नपयामि।

**शुद्धोदक स्नानं**

गंगाजलं मयानीतं महादेव शिरः स्थितम् । शुद्धोदक स्नान मिदं गृहाण जगदीश्वरि ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः शुद्धोदक स्नानं समर्पयामि ।

**७. वस्त्रम्**

उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥

सप्तास्यासन्परिधयः ।त्रिस्सप्त समिधः कृताः । देवायद्यज्ञं तन्वाना ।अबध्नन्पुरुषं पशुम् ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः वस्त्रं समर्पयामि ।

**८. उपवीतम्**

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥

तं यज्ञं बर्हिषि प्रोक्षन् । पुरुषं जातमग्रतः । तेन देवा अयजंत । साध्या ऋषयश्च ये ॥

ओं यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः यज्ञोपवीतं समर्पयामि ।

**९. श्रीगंधम्**

गंध द्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहो पह्वये श्रियम् ॥

तस्माद्यज्ञात्सर्वहुतः । संभृत पृषदाज्यं । पशूग् स्ता ग् श्चक्रेवायव्यान् । आरण्यान् ग्राम्याश्चये ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः दिव्य श्रीचंदनं समर्पयामि ।

चंदना नंतरं कुंकुम तिलकं समर्पयामि

**१०. आभरणम्**

मनसः काम माकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

तस्माद्यज्ञात्सर्वहुतः । ऋच स्सामानि जज्ञिरे । छंदागम् सि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः नवरत्न किरीट केयूरादि नानाभरणानि समर्पयामि।

**११. पुष्पम्**

कर्दमेन प्रजाभूता मयि संभवकर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

तस्मादश्वा अजायंत । ये के चोभयादतः । गावोहजज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः पुष्पमालां समर्पयामि ।

**अंग पूजां करिष्ये**

**लक्ष्मी अंगपूजा**

ओं चंचलायैनमः पादौ पूजयामि
ओं चपलायै नमः जानुनी पूजयामि
ओं पीतांबरधरायै नमः ऊरू पूजयामि
ओं कमलवासिन्यै नमः कटिं पूजयामि
ओं मदनमात्रे नमः स्तनौ पूजयामि
ओं पद्मालयायै नमः नाभिं पूजयामि
ओं ललितायै नमः भुजद्वयं पूजयामि
ओं कंबुकंठ्यै नमः कंठं पूजयामि
ओं सुमुखायै नमः मुखं पूजयामि
ओं श्रियै नमः ओष्ठौ पूजयामि
ओं सुनासिकायै नमः नासिकां पूजयामि
ओं सुनेत्र्यै नमः नेत्रे पूजयामि
ओं कमलालयायै नमः शिरः पूजयामि
ओं श्री लक्ष्मी देव्यै नमः सर्वाण्यंगानि पूजयामि।

**सरस्वती अंगपूजा**

ओं ब्रह्माण्यै नमः पादौ पूजयामि
ओं ब्रह्मण्यमूर्तये नमः गुल्फ़ौ पूजयामि
ओं जगत्स्वरूपिण्यै नमः जंघे पूजयामि
ओं जगदाद्यायै नमः जानुनी पूजयामि
ओं चारुविलासिन्यै नमः ऊरू पूजयामि
ओं कमलभूमये नमः कटिं पूजयामि

ओं जन्मरहितायै नमः जघनं पूजयामि
ओं हरिपूज्यायै नमः उदरं पूजयामि
ओं विशालवक्षसे नमः वक्षःस्थलं पूजयामि
ओं स्कंदप्रपूज्यायै नमः स्कन्धौ पूजयामि
ओं पुस्तकधारिण्यै नमः हस्तौ पूजयामि
ओं वेदस्वरूपायै नमः वक्त्रं पूजयामि
ओं बिम्बसमानोष्ट्यै नमः ओष्ठौ पूजयामि
ओं तिलकधारिण्यै नमः फालं पूजयामि
ओं सर्वप्रदायै नमः मुखं पूजयामि
ओं श्रीसरस्वती देव्यै नमः सर्वाण्यंगानि पूजयामि।
ओं गंभीरनाभये नमः नाभिं पूजयामि
ओं लोकमात्रे नमः स्तनौ पूजयामि
ओं गानविचक्षणायै नमः कंठं पूजयामि
ओं घनबाहवे नमः बाहू पूजयामि
ओं श्रोत्रियबंधवे नमः श्रोत्रे पूजयामि
ओं सुवासिन्यै नमः नासिकां पूजयामि
ओं कमलचक्षुसे नमः नेत्रे पूजयामि
ओं चन्द्रमूर्तये नमः चिकुरान्पूजयामि
ओं ब्रह्मस्वरूपिण्यै नमः शिरः पूजयामि

**दुर्गा अंगपूजा**

ओं दुर्गायै नमः पादौ पूजयामि।
ओं मंगलायै नमः जानुनी पूजयामि।
ओं व्रतप्रियायै नमः कटिं पूजयामि।
ओं गंभीरनाभये नमः नाभिं पूजयामि।
ओं सुवासिन्यर्चनप्रितायै नमः हृदयं पूजयामि।
ओं शूलाद्यायुधसंपन्नायै नमः भुजद्वयं पूजयामि।
ओं श्रीविद्यायै नमः वामहस्तं पूजयामि।
ओं विशालाक्ष्यै नमः नेत्रे पूजयामि।
ओं दिव्यविग्रहायै नमः ललाटं पूजयामि।
ओं श्री दुर्गा देव्यै नमः सर्वाण्यंगानि पूजयामि
ओं गूढगुल्फायै नमः गुल्फौ पूजयामि।
ओं महाकाल्यै नमः ऊरू पूजयामि।
ओं मृडान्यै नमः जंघे पूजयामि।
ओं शिवप्रियायै नमः उदरं पूजयामि।
ओं मदनमात्रे नमः स्तनौ पूजयामि।
ओं कामितार्थप्रदायिन्यै नमः दक्षिणहस्तं पूजयामि।
ओं कंबुकंठ्यै नमः कंठं पूजयामि।
ओं चंद्रनिभाननायै नमः मुखं पूजयामि।
ओं शिरस्थितायै नमः शिरः पूजयामि।

श्री शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः अंग पूजां पूजयामि

**सहस्त्रनाम / अष्टोत्तरशत नामपूजा**

**१२._धूपः _**

आपः स्त्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरं श्रियं वासय मे कुले ॥

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः धूपमाघ्रापयामि ।

**१३. दीपं__**

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

ब्राह्मणोऽस्य मुखमासीत् । बाहूराजन्यः कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्यागम् शूद्रो अजायत ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः दीपं दर्शयामि।
धूप दीपानंतरं शुद्धमाचमनीयं समर्पयामि ॥

## १४. नैवेद्यम्

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम्। चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

चंद्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥
ओं भूर्भवः स्वः ओं तत् सवितुर्वरेण्यम् । भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्।।.
सत्यं त्वर्तेन परिषिञ्चामि (ऋतं त्वा सत्येन परिषिञ्चामि) ।
अमृतमस्तु अमृतोपस्तरण मसि स्वाहा ।

| | | |
|---|---|---|
| ओं प्राणाय स्वाहा, | ओं व्यानाय स्वाहा, | ओं अपानाय स्वाहा |
| ओं उदानाय स्वाहा | ओं समानाय स्वाहा, | ओं ब्रह्मणे स्वाहा |
| मध्ये मध्ये पानीयं समर्पयामि । | अमृतापिधानमसि स्वाहा । | उत्तरापोशनं समर्पयामि । |
| हस्तौ प्रक्षाळ यामि। | पादौ प्रक्षाळ यामि । | शुद्धमाचमनीयं समर्पयामि । |

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः नैवेद्यं निवेदयामि ।

## १५. तांबूलम्

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विंदेयं पुरुषानहम् ॥

नाभ्या आसीदंतरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिश श्श्रोत्रात् । तथा लोकाग्ं अकल्पयन् ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः तांबूलं समर्पयामि ।

## १६. नीराजनम्

| | | | |
|---|---|---|---|
| वेदाहमेतं पुरुषं महांतं । | आदित्यवर्णं तमसस्तु पारे । | | |
| सर्वाणि रूपाणि विचित्य धीरः । | नामानि कृत्वाभिवदन् यदास्ते ॥ | | |
| धाता पुरस्ताद्यमुदाजहार । | शक्रः प्रविद्वान् प्रदिशश्चतस्रः । | | |
| तमेवं विद्वानमृत इह भवति । | नान्यः पन्था अयनाय विद्यते ॥ | | |
| यज्ञेन यज्ञ मयजंत देवाः । | तानि धर्माणि प्रथमान्यासन्न् । | | |
| ते ह नाकं महिमानस्सचंते । | यत्र पूर्वे साध्यास्संति देवाः ॥ | | |
| ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । | अहोरात्रे पार्श्वे । | नक्षत्राणि रूपम् । | |
| अश्विनौ व्यात्तम् । | इष्टं मनिषाण । | अमुं मनिषाण । | सर्वं मनिषाण ।। |

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः आनंद मङ्गळनीराजनं दर्शयामि। नीराजनानंतरं शुद्धमाचमनीयं समर्पयामि।।

## १७. मंत्रपुष्पम्

ओं राजाधि राजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय कुर्महे।
समे कामान् काम कामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु।
कुबेराय वैश्रवणाय। महाराजाय नमः
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ।।
सर्व मंगळ मांगळ्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यंबिके देवि नारायणि नमोऽस्तुते ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः सुवर्णदिव्य मंत्रपुष्पं समर्पयामि।

## १८. नमस्कारं करिष्ये_

अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात् कारुण्य भावेन रक्ष मां जगदीश्वरि ॥

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः आत्म प्रदक्षिण नमस्कारान् समर्पयामि।

## १९. उपचारान् करिष्ये_

श्री रुद्र सहित शक्तिस्वरूपायै श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायै नमः

छत्रम् आच्छादयामि। चामरं वीजयामि। दर्पणं दर्शयामि।
अश्वम् आरोहयामि। गजमारोहयामि। आंदोळिकामारोह यामि।
गीतं श्रावयामि, नृत्यं दर्शयामि,
समस्त देवोपचार, राजोपचार , भक्त्योपचार पूजां समर्पयामि ॥

## २०._पूजासमर्पणम्

मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥

अनेन श्रीसूक्त/पुरुष सूक्त विधानेन कल्पोक्त प्रकारेण ध्यान आवाहन पूर्वक यथाशक्ति षोडशोपचार पूजनेन श्री रुद्र सहित शक्तिस्वरूपा श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिका सुप्रीता सुप्रसन्ना वरदा भवतु ।
एतत् फलं सर्वं श्री रुद्र सहित शक्तिस्वरूपा श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिका पादारविन्दार्पणमस्तु।।

### २१. प्रसादस्वीकरणम्

श्री रुद्र सहित शक्तिस्वरूपायाः श्रीमहाकाळीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकायाः प्रसादं शिरसा गृह्णामि ।

### प्रार्थना

या देवी सर्वभूतेषु शक्ति रूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः।।

## Sri Lalitha Sahasranamavali:

### ध्यानं

सिंदूरारुण विग्रहां त्रिनयनां माणिक्यमौळि स्फुरत्
तारानायकशेखरां स्मितमुखीमापीन वक्षोरुहां।
पाणिभ्यामळिपूर्ण रत्न चषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्न घटस्थ रक्तचरणां ध्यायेत्परामंबिकाम्।।

ओं ऐं ह्रीं श्रीं
१ ओं श्रीमात्रे नमः
२ ओं श्रीमहाराज्ञ्यै नमः
३ ओं श्रीमत्सिंहासनेश्वर्यै नमः
४ ओं चिदग्निकुंडसंभूतायै नमः
५ ओं देवकार्यसमुद्यतायै नमः
६ ओं उद्यद्भानुसहस्राभायै नमः
७ ओं चतुर्बाहुसमन्वितायै नमः
८ ओं रागस्वरूपपाशाढ्यायै नमः
९ ओं क्रोधाकारांकुशोज्ज्वलायै नमः
१० ओं मनोरूपेक्षुकोदंडायै नमः
११ ओं पंचतन्मात्रसायकायै नमः
१२ ओं निजारुणप्रभापूरमज्जद् ब्रह्माण्डमण्डलायै नमः
१३ ओं चंपकाशोकपुन्नागसौगंधिकलसत्कचायै नमः
१४ ओं कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डितायै नमः
१५ ओं अष्टमीचंद्रविभ्राजदलिकस्थलशोभितायै नमः
१६ ओं मुखचंद्रकळंकाभमृगनाभिविशेषिकायै नमः
१७ ओं वदनस्मरमांगल्यगृहतोरणचिल्लिकायै नमः
१८ ओं वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचनायै नमः
१९ ओं नवचंपकपुष्पाभनासादंडविराजितायै नमः
२० ओं ताराकांतितिरस्कारिनासाभरणभासुरायै नमः
२१ ओं कदंबमञ्जरीक्लुप्तकर्णपूरमनोहरायै नमः
२२ ओं ताटंकयुगळीभूततपनोडुपमंडलायै नमः
२३ ओं पद्मरागशिलादर्शपरिभाविकपोलभुवे नमः
२४ ओं नवविद्रुमबिंबश्रीन्यक्कारिरदनच्छदायै नमः
२५ ओं शुद्धविद्यांकुराकारद्विजपंक्तिद्वयोज्ज्वलायै नमः
२६ ओं कर्पूरवीटिकामोदसमाकर्षिदिगन्तरायै नमः
२७ ओं निजसंल्लापमाधुर्य विनिर्भर्त्सितकच्छप्यै नमः
२८ ओं मंदस्मितप्रभापूरमज्जत्कामेशमानसायै नमः
२९ ओं अनाकलितसादृश्यचिबुकश्रीविराजितायै नमः
३० ओं कामेशबद्धमांगल्यसूत्रशोभितकन्धरायै नमः
३१ ओं कनकांगदकेयूरकमनीयभुजान्वितायै नमः
३२ ओं रत्नग्रैवेय चिंताकलोलमुक्ताफलान्वितायै नमः
३३ ओं कामेश्वरप्रेमरत्नमणिप्रतिपणस्तन्यै नमः
३४ ओं नाभ्यालवालरोमालिलताफलकुचद्वय्यै नमः
३५ ओं लक्ष्यरोमलताधारतासमुन्नेयमध्यमायै नमः
३६ ओं स्तनभारदलन्मध्यपट्टबंधवलित्रयायै नमः
३७ ओं अरुणारुणकौसुंभवस्त्रभास्वत्कटीतट्यै नमः
३८ ओं रत्नकिंकिणिकारम्यरशनादामभूषितायै नमः
३९ ओं कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्वितायै नमः
४० ओं माणिक्यमुकुटाकारजानुद्वयविराजितायै नमः
४१ ओं इंद्रगोपपरिक्षिप्तस्मरतूणाभजंघिकायै नमः
४२ ओं गूढगुल्फायै नमः
४३ ओं कूर्म पृष्ठजयिष्णुप्रपदान्वितायै नमः
४४ ओं नखदीधितिसंछन्ननमज्जनतमोगुणायै नमः
४५ ओं पदद्वयप्रभाजालपराकृतसरोरुहायै नमः

४६ ओं शिञ्जानमणिमंजीरमंडितश्रीपदांबुजायै नमः
४७ ओं मराळीमंदगमनायै नमः
४८ ओं महालावण्यशेवधये नमः
४९ ओं सर्वारुणायै नमः
५० ओं अनवद्यांग्यै नमः
५१ ओं सर्वाभरणभूषितायै नमः
५२ ओं शिवकामेश्वरांकस्थायै नमः
५३ ओं शिवायै नमः
५४ ओं स्वाधीनवल्लभायै नमः
५५ ओं सुमेरुमध्यश्रृङ्गस्थायै नमः
५६ ओं श्रीमन्नगरनायिकायै नमः
५७ ओं चिंतामणिगृहांतःस्थायै नमः
५८ ओं पञ्चब्रह्मासनस्थितायै नमः
५९ ओं महापद्माटवीसंस्थायै नमः
६० ओं कदंबवनवासिन्यै नमः
६१ ओं सुधासागरमध्यस्थायै नमः
६२ ओं कामाक्ष्यै नमः
६३ ओं कामदायिन्यै नमः
६४ ओं देवर्षिगणसंघातस्तूयमानात्मवैभवायै नमः
६५ ओं भण्डासुरवधोद्युक्तशक्तिसेनासमन्वितायै नमः
६६ ओं सम्पत्करीसमासूढसिन्धुरव्रजसेवितायै नमः
६७ ओं अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृतायै नमः
६८ ओं चक्रराजरथारूढसर्वायुधपरिष्कृतायै नमः
६९ ओं गेयचक्ररथारूढमंत्रिणीपरिसेवितायै नमः
७० ओं किरिचक्ररथारूढदंडनाथपुरस्कृतायै नमः
७१ ओं ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगायै नमः
७२ ओं भंडसैन्यवधोद्युक्तशक्तिविक्रमहर्षितायै नमः
७३ ओं नित्यापराक्रमाटोपनिरीक्षणसमुत्सुकायै नमः
७४ ओं भंडपुत्रवधोद्युक्तबालाविक्रमनंदितायै नमः
७५ ओं मंत्रिण्यंबाविरचितविषंगवधतोषितायै नमः
७६ ओं विशुक्रप्राणहरणवाराहीवीर्यनंदितायै नमः
७७ ओं कामेश्वरमुखालोककल्पितश्रीगणेश्वरायै नमः
७८ ओं महागणेशनिर्भिन्नविघ्नयंत्रप्रहर्षितायै नमः
७९ ओं भंडासुरेंद्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिण्यै नमः
८० ओं करांगुळिनखोत्पन्ननारायणदशाकृत्यै नमः
८१ ओं महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिकायै नमः
८२ ओं कामेश्वरास्त्रनिर्दग्धसभंडासुरशून्यकायै नमः
८३ ओं ब्रह्मोपेंद्रमहेंद्रादिदेवसंस्तुतवैभवायै नमः
८४ ओं हरनेत्राग्निसंदग्धकामसंजीवनौषध्यै नमः
८५ ओं श्रीमद्वाग्भवकूटैकस्वरूपमुखपंकजायै नमः
८६ ओं कंठाधः कटिपर्यंतमध्यकूटस्वरूपिण्यै नमः
८७ ओं शक्तिकूटैकतापन्नकट्यधोभागधारिण्यै नमः
८८ ओं मूलमंत्रात्मिकायै नमः
८९ ओं मूलकूटत्रयकलेबरायै नमः
९० ओं कुलामृतैकरसिकायै नमः
९१ ओं कुलसंकेतपालिन्यै नमः
९२ ओं कुळांगनायै नमः
९३ ओं कुलांतःस्थायै नमः
९४ ओं कौळिन्यै नमः
९५ ओं कुलयोगिन्यै नमः
९६ ओं अकुलायै नमः
९७ ओं समयांतःस्थायै नमः
९८ ओं समयाचारतत्परायै नमः
९९ ओं मूलाधारैकनिलयायै नमः
१०० ओं ब्रह्मग्रंथिविभेदिन्यै नमः
१०१ ओं मणिपूरांतरुदितायै नमः
१०२ ओं विष्णुग्रंथिविभेदिन्यै नमः
१०३ ओं आज्ञाचक्रांतरालस्थायै नमः
१०४ ओं रुद्रग्रंथिविभेदिन्यै नमः
१०५ ओं सहस्रारांबुजारूढायै नमः
१०६ ओं सुधासाराभिवर्षिण्यै नमः
१०७ ओं तटिल्लतासमरुच्यै नमः
१०८ ओं षट्चक्रोपरिसंस्थितायै नमः
१०९ ओं महाशक्त्यै नमः
११० ओं कुंडलिन्यै नमः
१११ ओं बिसतंतुतनीयस्यै नमः
११२ ओं भवान्यै नमः
११३ ओं भावनागम्यायै नमः
११४ ओं भवारण्यकुठारिकायै नमः
११५ ओं भद्रप्रियायै नमः
११६ ओं भद्रमूर्त्यै नमः
११७ ओं भक्तसौभाग्यदायिन्यै नमः
११८ ओं भक्तिप्रियायै नमः
११९ ओं भक्तिगम्यायै नमः
१२० ओं भक्तिवश्यायै नमः
१२१ ओं भयापहायै नमः

१२२ ओं शांभव्यै नमः
१२३ ओं शारदाराध्यायै नमः
१२४ ओं शर्वाण्यै नमः
१२५ ओं शर्मदायिन्यै नमः
१२६ ओं शांकर्यै नमः
१२७ ओं श्रीकर्यै नमः
१२८ ओं साध्व्यै नमः
१२९ ओं शरच्चंद्रनिभाननायै नमः
१३० ओं शातोदर्यै नमः
१३१ ओं शांतिमत्यै नमः
१३२ ओं निराधारायै नमः
१३३ ओं निरंजनायै नमः
१३४ ओं निर्लेपायै नमः
१३५ ओं निर्मलायै नमः
१३६ ओं नित्यायै नमः
१३७ ओं निराकारायै नमः
१३८ ओं निराकुलायै नमः
१३९ ओं निर्गुणायै नमः
१४० ओं निष्कलायै नमः
१४१ ओं शांतायै नमः
१४२ ओं निष्कामायै नमः
१४३ ओं निरुपप्लवायै नमः
१४४ ओं नित्यमुक्तायै नमः
१४५ ओं निर्विकारायै नमः
१४६ ओं निष्प्रपंचायै नमः
१४७ ओं निराश्रयायै नमः
१४८ ओं नित्यशुद्धायै नमः
१४९ ओं नित्यबुद्धायै नमः
१५० ओं निरवद्यायै नमः
१५१ ओं निरंतरायै नमः
१५२ ओं निष्कारणायै नमः
१५३ ओं निष्कळंकायै नमः
१५४ ओं निरुपाधये नमः
१५५ ओं निरीश्वरायै नमः
१५६ ओं नीरागायै नमः
१५७ ओं रागमथन्यै नमः
१५८ ओं निर्मदायै नमः
१५९ ओं मदनाशिन्यै नमः
१६० ओं निश्चिंतायै नमः
१६१ ओं निरहंकारायै नमः
१६२ ओं निर्मोहायै नमः
१६३ ओं मोहनाशिन्यै नमः
१६४ ओं निर्ममायै नमः
१६५ ओं ममताहंत्र्यै नमः
१६६ ओं निष्पापायै नमः
१६७ ओं पापनाशिन्यै नमः
१६८ ओं निष्क्रोधायै नमः
१६९ ओं क्रोधशमन्यै नमः
१७० ओं निर्लोभायै नमः
१७१ ओं लोभनाशिन्यै नमः
१७२ ओं निस्संशयायै नमः
१७३ ओं संशयघ्न्यै नमः
१७४ ओं निर्भवायै नमः
१७५ ओं भवनाशिन्यै नमः
१७६ ओं निर्विकल्पायै नमः
१७७ ओं निराबाधायै नमः
१७८ ओं निर्भेदायै नमः
१७९ ओं भेदनाशिन्यै नमः
१८० ओं निर्नाशायै नमः
१८१ ओं मृत्युमथिन्यै नमः
१८२ ओं निष्क्रियायै नमः
१८३ ओं निष्परिग्रहायै नमः
१८४ ओं निस्तुलायै नमः
१८५ ओं नीलचिकुरायै नमः
१८६ ओं निरपायायै नमः
१८७ ओं निरत्ययायै नमः
१८८ ओं दुर्लभायै नमः
१८९ ओं दुर्गमायै नमः
१९० ओं दुर्गायै नमः
१९१ ओं दुःखहंत्र्यै नमः
१९२ ओं सुखप्रदायै नमः
१९३ ओं दुष्टदूरायै नमः
१९४ ओं दुराचारशमन्यै नमः
१९५ ओं दोषवर्जितायै नमः
१९६ ओं सर्वज्ञायै नमः
१९७ ओं सांद्रकरुणायै नमः
१९८ ओं समानाधिकवर्जितायै नमः
१९९ ओं सर्वशक्तिमय्यै नमः
२०० ओं सर्वमंगलायै नमः
२०१ ओं सद्गतिप्रदायै नमः
२०२ ओं सर्वेश्वर्यै नमः
२०३ ओं सर्वमय्यै नमः
२०४ ओं सर्वमंत्रस्वरूपिण्यै नमः
२०५ ओं सर्वयंत्रात्मिकायै नमः
२०६ ओं सर्वतंत्ररूपायै नमः
२०७ ओं मनोन्मन्यै नमः
२०८ ओं माहेश्वर्यै नमः
२०९ ओं महादेव्यै नमः
२१० ओं महालक्ष्म्यै नमः
२११ ओं मृडप्रियायै नमः
२१२ ओं महारूपायै नमः
२१३ ओं महापूज्यायै नमः
२१४ ओं महापातकनाशिन्यै नमः
२१५ ओं महामायायै नमः
२१६ ओं महासत्त्वायै नमः
२१७ ओं महाशक्त्यै नमः
२१८ ओं महारत्यै नमः
२१९ ओं महाभोगायै नमः
२२० ओं महैश्वर्यायै नमः
२२१ ओं महावीर्यायै नमः
२२२ ओं महाबलायै नमः
२२३ ओं महाबुद्ध्यै नमः
२२४ ओं महासिद्ध्यै नमः
२२५ ओं महायोगेश्वरेश्वर्यै नमः
२२६ ओं महातंत्रायै नमः
२२७ ओं महामंत्रायै नमः
२२८ ओं महायंत्रायै नमः
२२९ ओं महासनायै नमः
२३० ओं महायागक्रमाराध्यायै नमः
२३१ ओं महाभैरवपूजितायै नमः
२३२ ओं महेश्वरमहाकल्पमहा

ताण्डवसाक्षिण्यै नमः
२३३ ओं महाकामेशमहिष्यै नमः
२३४ ओं महात्रिपुरसुंदर्यै नमः
२३५ ओं चतुःषष्ट्युपचाराढ्यायै नमः
२३६ ओं चतुःषष्टिकलामय्यै नमः
२३७ ओं महाचतुःषष्टिकोटि योगिनीगणसेवितायै नमः
२३८ ओं मनुविद्यायै नमः
२३९ ओं चंद्रविद्यायै नमः
२४० ओं चंद्रमंडलमध्यगायै नमः
२४१ ओं चारुरूपायै नमः
२४२ ओं चारुहासायै नमः
२४३ ओं चारुचंद्रकलाधरायै नमः
२४४ ओं चराचरजगन्नाथायै नमः
२४५ ओं चक्रराजनिकेतनायै नमः
२४६ ओं पार्वत्यै नमः
२४७ ओं पद्मनयनायै नमः
२४८ ओं पद्मरागसमप्रभायै नमः
२४९ ओं पंचप्रेतासनासीनायै नमः
२५० ओं पंचब्रह्मस्वरूपिण्यै नमः
२५१ ओं चिन्मय्यै नमः
२५२ ओं परमानंदायै नमः
२५३ ओं विज्ञानघनरूपिण्यै नमः
२५४ ओं ध्यानध्यातृध्येयरूपायै नमः
२५५ ओं धर्माधर्मविवर्जितायै नमः
२५६ ओं विश्वरूपायै नमः
२५७ ओं जागरिण्यै नमः
२५८ ओं स्वपन्त्यै नमः
२५९ ओं तैजसात्मिकायै नमः
२६० ओं सुप्तायै नमः
२६१ ओं प्राज्ञात्मिकायै नमः
२६२ ओं तुर्यायै नमः
२६३ ओं सर्वावस्थाविवर्जितायै नमः
२६४ ओं सृष्टिकर्त्र्यै नमः
२६५ ओं ब्रह्मरूपायै नमः
२६६ ओं गोप्त्र्यै नमः
२६७ ओं गोविंदरूपिण्यै नमः
२६८ ओं संहारिण्यै नमः
२६९ ओं रुद्ररूपायै नमः
२७० ओं तिरोधानकर्यै नमः
२७१ ओं ईश्वर्यै नमः
२७२ ओं सदाशिवायै नमः
२७३ ओं अनुग्रहदायै नमः
२७४ ओं पंचकृत्यपरायणायै नमः
२७५ ओं भानुमंडलमध्यस्थायै नमः
२७६ ओं भैरव्यै नमः
२७७ ओं भगमालिन्यै नमः
२७८ ओं पद्मासनायै नमः
२७९ ओं भगवत्यै नमः
२८० ओं पद्मनाभसहोदर्यै नमः
२८१ ओं उन्मेषनिमिषोत्पन्नवि पन्नभुवनावल्यै नमः
२८२ ओं सहस्रशीर्षवदनायै नमः
२८३ ओं सहस्राक्ष्यै नमः
२८४ ओं सहस्रपदे नमः
२८५ ओं आब्रह्मकीटजनन्यै नमः
२८६ ओं वर्णाश्रमविधायिन्यै नमः
२८७ ओं निजाज्ञारूपनिगमायै नमः
२८८ ओं पुण्यापुण्यफलप्रदायै नमः
२८९ ओं श्रुतिसीमंतसिंदूरीकृत पादाब्जधूळिकायै नमः
२९० ओं सकलागमसंदोहशुक्ति सं पुटमोक्तिकायै नमः
२९१ ओं पुरुषार्थप्रदायै नमः
२९२ ओं पूर्णायै नमः
२९३ ओं भोगिन्यै नमः
२९४ ओं भुवनेश्वर्यै नमः
२९५ ओं अंबिकायै नमः
२९६ ओं अनादिनिधनायै नमः
२९७ ओं हरिब्रह्मेंद्रसेवितायै नमः
२९८ ओं नारायण्यै नमः
२९९ ओं नादरूपायै नमः
३०० ओं नामरूपविवर्जितायै नमः
३०१ ओं ह्रींकार्यै नमः
३०२ ओं ह्रीमत्यै नमः
३०३ ओं हृद्यायै नमः
३०४ ओं हेयोपादेयवर्जितायै नमः
३०५ ओं राजराजार्चितायै नमः
३०६ ओं राज्ञै नमः
३०७ ओं रम्यायै नमः
३०८ ओं राजीवलोचनायै नमः
३०९ ओं रंजन्यै नमः
३१० ओं रमण्यै नमः
३११ ओं रस्यायै नमः
३१२ ओं रणत्किंकिणिमेखलायै नमः
३१३ ओं रमायै नमः
३१४ ओं राकेंदुवदनायै नमः
३१५ ओं रतिरूपायै नमः
३१६ ओं रतिप्रियायै नमः
३१७ ओं रक्षाकर्यै नमः
३१८ ओं राक्षसघ्न्यै नमः
३१९ ओं रामायै नमः
३२० ओं रमणलंपटायै नमः
३२१ ओं काम्यायै नमः
३२२ ओं कामकलारूपायै नमः
३२३ ओं कदंबकुसुमप्रियायै नमः
३२४ ओं कल्याण्यै नमः
३२५ ओं जगतीकंदायै नमः
३२६ ओं करुणारससागरायै नमः
३२७ ओं कलावत्यै नमः

३२८ ओं कलालापायै नमः
३२९ ओं कांतायै नमः
३३० ओं कादंबरीप्रियायै नमः
३३१ ओं वरदायै नमः
३३२ ओं वामनयनायै नमः
३३३ ओं वारुणीमदविह्वलायै नमः
३३४ ओं विश्वाधिकायै नमः
३३५ ओं वेदवेद्यायै नमः
३३६ ओं विंध्याचलनिवासिन्यै नमः
३३७ ओं विधात्र्यै नमः
३३८ ओं वेदजनन्यै नमः
३३९ ओं विष्णुमायायै नमः
३४० ओं विलासिन्यै नमः
३४१ ओं क्षेत्रस्वरूपायै नमः
३४२ ओं क्षेत्रेश्यै नमः
३४३ ओं क्षेत्रक्षेत्रज्ञपालिन्यै नमः
३४४ ओं क्षयवृद्धिविनिर्मुक्तायै नमः
३४५ ओं क्षेत्रपालसमर्चितायै नमः
३४६ ओं विजयायै नमः
३४७ ओं विमलायै नमः
३४८ ओं वंद्यायै नमः
३४९ ओं वंदारुजनवत्सलायै नमः
३५० ओं वाग्वादिन्यै नमः
३५१ ओं वामकेश्यै नमः
३५२ ओं वह्निमंडलवासिन्यै नमः
३५३ ओं भक्तिमत्कल्पलतिकायै नमः
३५४ ओं पशुपाशविमोचिन्यै नमः
३५५ ओं संहृताशेषपाषण्डायै नमः
३५६ ओं सदाचारप्रवर्तिकायै नमः
३५७ ओं तापत्रयाग्निसंत
प्तसमाह्लादनचंद्रिकायै नमः
३५८ ओं तरुण्यै नमः
३५९ ओं तापसाराध्यायै नमः
३६० ओं तनुमध्यायै नमः
३६१ ओं तमोपहायै नमः
३६२ ओं चित्यै नमः
३६३ ओं तत्पदलक्ष्यार्थायै नमः
३६४ ओं चिदेकरसरूपिण्यै नमः
३६५ ओं स्वात्मानंदलवीभूत-
ब्रह्माद्यानंदसंतत्यै नमः
३६६ ओं परायै नमः
३६७ ओं प्रत्यक्चितीरूपायै नमः
३६८ ओं पश्यंत्यै नमः
३६९ ओं परदेवतायै नमः
३७० ओं मध्यमायै नमः
३७१ ओं वैखरीरूपायै नमः
३७२ ओं भक्तमानसहंसिकायै नमः
३७३ ओं कामेश्वरप्राणनाड्यै नमः
३७४ ओं कृतज्ञायै नमः
३७५ ओं कामपूजितायै नमः
३७६ ओं श्रृङ्गाररससंपूर्णायै नमः
३७७ ओं जयायै नमः
३७८ ओं जालंधरस्थितायै नमः
३७९ ओं ओड्याणपीठनिलयायै नमः
३८० ओं बिंदुमंडलवासिन्यै नमः
३८१ ओं रहोयागक्रमाराध्यायै नमः
३८२ ओं रहस्तर्पणतर्पितायै नमः
३८३ ओं सद्यः प्रसादिन्यै नमः
३८४ ओं विश्वसाक्षिण्यै नमः
३८५ ओं साक्षिवर्जितायै नमः
३८६ ओं षडंगदेवतायुक्तायै नमः
३८७ ओं षाड्गुण्यपरिपूरितायै नमः
३८८ ओं नित्यक्लिन्नायै नमः
३८९ ओं निरुपमायै नमः
३९० ओं निर्वाणसुखदायिन्यै नमः
३९१ ओं नित्याषोडशिकारूपायै नमः
३९२ ओं श्रीकण्ठार्धशरीरिण्यै नमः
३९३ ओं प्रभावत्यै नमः
३९४ ओं प्रभारूपायै नमः
३९५ ओं प्रसिद्धायै नमः
३९६ ओं परमेश्वर्यै नमः
३९७ ओं मूलप्रकृत्यै नमः
३९८ ओं अव्यक्तायै नमः
३९९ ओं व्यक्ताव्यक्तस्वरूपिण्यै नमः
४०० ओं व्यापिन्यै नमः
४०१ ओं विविधाकारायै नमः
४०२ ओं विद्याविद्यास्वरूपिण्यै नमः
४०३ ओं महाकामेशनयनकुमुदाह्लादकौमुद्यै नमः
४०४ ओं भक्ताहार्दतमोभेदभानुमद्भानुसंतत्यै नमः
४०५ ओं शिवदूत्यै नमः
४०६ ओं शिवाराध्यायै नमः
४०७ ओं शिवमूर्त्यै नमः
४०८ ओं शिवंकर्यै नमः
४०९ ओं शिवप्रियायै नमः
४१० ओं शिवपरायै नमः
४११ ओं शिष्टेष्टायै नमः
४१२ ओं शिष्टपूजितायै नमः
४१३ ओं अप्रमेयायै नमः
४१४ ओं स्वप्रकाशायै नमः

४१५ ओं मनोवाचामगोचरायै नमः
४१६ ओं चिच्छक्त्यै नमः
४१७ ओं चेतनारूपायै नमः
४१८ ओं जडशक्त्यै नमः
४१९ ओं जडात्मिकायै नमः
४२० ओं गायत्र्यै नमः
४२१ ओं व्याहृत्यै नमः
४२२ ओं संध्यायै नमः
४२३ ओं द्विजवृंदनिषेवितायै नमः
४२४ ओं तत्त्वासनायै नमः
४२५ ओं तत्त्वमय्यै नमः
४२६ ओं पंचकोशांतरस्थितायै नमः
४२७ ओं निःसीममहिम्ने नमः
४२८ ओं नित्ययौवनायै नमः
४२९ ओं मदशालिन्यै नमः
४३० ओं मदघूर्णितरक्ताक्ष्यै नमः
४३१ ओं मदपाटलगंडभुवे नमः
४३२ ओं चंदनद्रवदिग्धाण्ग्यै नमः
४३३ ओं चांपेयकुसुमप्रियायै नमः
४३४ ओं कुशलायै नमः
४३५ ओं कोमलाकारायै नमः
४३६ ओं कुरुकुल्लायै नमः
४३७ ओं कुलेश्वर्यै नमः
४३८ ओं कुलकुंडालयायै नमः
४३९ ओं कौलमार्गतत्परसेवितायै नमः
४४० ओं कुमारगणनाथांबायै नमः
४४१ ओं तुष्ट्यै नमः
४४२ ओं पुष्ट्यै नमः
४४३ ओं मत्यै नमः
४४४ ओं धृत्यै नमः
४४५ ओं शांत्यै नमः
४४६ ओं स्वस्तिमत्यै नमः
४४७ ओं कांत्यै नमः
४४८ ओं नंदिन्यै नमः
४४९ ओं विघ्ननाशिन्यै नमः
४५० ओं तेजोवत्यै नमः
४५१ ओं त्रिनयनायै नमः
४५२ ओं लोलाक्ष्यै नमः
४५३ ओं कामरूपिण्यै नमः
४५४ ओं मालिन्यै नमः
४५५ ओं हंसिन्यै नमः
४५६ ओं मात्रे नमः
४५७ ओं मलयाचलवासिन्यै नमः
४५८ ओं सुमुख्यै नमः
४५९ ओं नलिन्यै नमः
४६० ओं सुभ्रुवे नमः
४६१ ओं शोभनायै नमः
४६२ ओं सुरनायिकायै नमः
४६३ ओं कालकंठ्यै नमः
४६४ ओं कांतिमत्यै नमः
४६५ ओं क्षोभिण्यै नमः
४६६ ओं सूक्ष्मरूपिण्यै नमः
४६७ ओं वज्रेश्वर्यै नमः
४६८ ओं वामदेव्यै नमः
४६९ ओं वयोऽवस्थाविवर्जितायै नमः
४७० ओं सिद्धेश्वर्यै नमः
४७१ ओं सिद्धविद्यायै नमः
४७२ ओं सिद्धमात्रे नमः
४७३ ओं यशस्विन्यै नमः
४७४ ओं विशुद्धिचक्रनिलयायै नमः
४७५ ओं आरक्तवर्णायै नमः
४७६ ओं त्रिलोचनायै नमः
४७७ ओं खट्वांगादिप्रहरणायै नमः
४७८ ओं वदनैकसमन्वितायै नमः
४७९ ओं पायसान्नप्रियायै नमः
४८० ओं त्वक्स्थायै नमः
४८१ ओं पशुलोकभयंकर्यै नमः
४८२ ओं अमृतादिमहाशक्तिसंवृतायै नमः
४८३ ओं डाकिनीश्वर्यै नमः
४८४ ओं अनाहताब्जनिलयायै नमः
४८५ ओं श्यामाभायै नमः
४८६ ओं वदनद्वयायै नमः
४८७ ओं दंष्ट्रोज्वलायै नमः
४८८ ओं अक्षमालादिधरायै नमः
४८९ ओं रुधिरसंस्थितायै नमः
४९० ओं कालरात्र्यादिशक्त्यौघवृतायै नमः
४९१ ओं स्निग्धौदनप्रियायै नमः
४९२ ओं महावीरेंद्रवरदायै नमः
४९३ ओं राकिण्यंबास्वरूपिण्यै नमः
४९४ ओं मणिपूराब्जनिलयायै नमः
४९५ ओं वदनत्रयसंयुतायै नमः
४९६ ओं वज्राधिकायुधोपेतायै नमः
४९७ ओं डामर्यादिभिरावृतायै नमः
४९८ ओं रक्तवर्णायै नमः
४९९ ओं मांसनिष्ठायै नमः
५०० ओं गुडान्नप्रीतमानसायै नमः
५०१ ओं समस्तभक्तसुखदायै नमः
५०२ ओं लाकिन्यंबास्वरूपिण्यै नमः
५०३ ओं स्वाधिष्ठानाम्बुजगतायै नमः
५०४ ओं चतुर्वक्त्रमनोहरायै नमः
५०५ ओं शूलाद्यायुधसंपन्नायै नमः
५०६ ओं पीतवर्णायै नमः
५०७ ओं अतिगर्वितायै नमः
५०८ ओं मेदोनिष्ठायै नमः

५०९ ओं मधुप्रीतायै नमः
५१० ओं बंधिन्यादिसमन्वितायै नमः
५११ ओं दध्यन्नासक्तहृदयायै नमः
५१२ ओं काकिनीरूपधारिण्यै नमः
५१३ ओं मूलाधारांबुजारूढायै नमः
५१४ ओं पंचवक्त्रायै नमः
५१५ ओं अस्थिसंस्थितायै नमः
५१६ ओं अंकुशादिप्रहरणायै नमः
५१७ ओं वरदादि निषेवितायै नमः
५१८ ओं मुद्गौदनासक्तचित्तायै नमः
५१९ ओं साकिन्यंबास्वरूपिण्यै नमः
५२० ओं आज्ञाचक्राब्जनिलायै नमः
५२१ ओं शुक्लवर्णायै नमः
५२२ ओं षडाननायै नमः
५२३ ओं मज्जासंस्थायै नमः
५२४ ओं हंसवत्यै नमः
५२५ ओं मुख्यशक्तिसमन्वितायै नमः
५२६ ओं हरिद्रान्नैकरसिकायै नमः
५२७ ओं हाकिनीरूपधारिण्यै नमः
५२८ ओं सहस्रदलपद्मस्थायै नमः
५२९ ओं सर्ववर्णोपशोभितायै नमः
५३० ओं सर्वायुधधरायै नमः
५३१ ओं शुक्लसंस्थितायै नमः
५३२ ओं सर्वतोमुख्यै नमः
५३३ ओं सर्वौदनप्रीतचित्तायै नमः
५३४ ओं याकिन्यंबास्वरूपिण्यै नमः
५३५ ओं स्वाहायै नमः
५३६ ओं स्वधायै नमः
५३७ ओं मत्यै नमः
५३८ ओं मेधायै नमः
५३९ ओं श्रुत्यै नमः
५४० ओं स्मृत्यै नमः
५४१ ओं अनुत्तमायै नमः
५४२ ओं पुण्यकीर्त्यै नमः
५४३ ओं पुण्यलभ्यायै नमः
५४४ ओं पुण्यश्रवणकीर्तनायै नमः
५४५ ओं पुलोमजार्चितायै नमः
५४६ ओं बंधमोचन्यै नमः
५४७ ओं बर्बरालकायै नमः
५४८ ओं विमर्शरूपिण्यै नमः
५४९ ओं विद्यायै नमः
५५० ओं वियदादिजगत्प्रस्वै नमः
५५१ ओं सर्व व्याधिप्रशमन्यै नमः
५५२ ओं सर्व मृत्युनिवारिण्यै नमः
५५३ ओं अग्रगण्यायै नमः
५५४ ओं अचिंत्यरूपायै नमः
५५५ ओं कलिकल्मषनाशिन्यै नमः
५५६ ओं कात्यायन्यै नमः
५५७ ओं कालहंत्र्यै नमः
५५८ ओं कमलाक्षनिषेवितायै नमः
५५९ ओं तांबूलपूरितमुख्यै नमः
५६० ओं दाडिमीकुसुमप्रभायै नमः
५६१ ओं मृगाक्ष्यै नमः
५६२ ओं मोहिन्यै नमः
५६३ ओं मुख्यायै नमः
५६४ ओं मृडान्यै नमः
५६५ ओं मित्ररूपिण्यै नमः
५६६ ओं नित्यतृप्तायै नमः
५६७ ओं भक्तनिधये नमः
५६८ ओं नियंत्र्यै नमः
५६९ ओं निखिलेश्वर्यै नमः
५७० ओं मैत्र्यादिवासनालभ्यायै नमः
५७१ ओं महाप्रलयसाक्षिण्यै नमः
५७२ ओं पराशक्त्यै नमः
५७३ ओं परानिष्ठायै नमः
५७४ ओं प्रज्ञानघनरूपिण्यै नमः
५७५ ओं माध्वीपानालसायै नमः
५७६ ओं मत्तायै नमः
५७७ ओं मातृकावर्ण रूपिण्यै नमः
५७८ ओं महाकैलासनिलयायै नमः
५७९ ओं मृणालमृदुदोर्लतायै नमः
५८० ओं महनीयायै नमः
५८१ ओं दयामूर्त्यै नमः
५८२ ओं महासाम्राज्यशालिन्यै नमः
५८३ ओं आत्मविद्यायै नमः
५८४ ओं महाविद्यायै नमः
५८५ ओं श्रीविद्यायै नमः
५८६ ओं कामसेवितायै नमः
५८७ ओं श्रीषोडशाक्षरीविद्यायै नमः
५८८ ओं त्रिकूटायै नमः
५८९ ओं कामकोटिकायै नमः
५९० ओं कटाक्षकिंकरीभूतकमलाकोटिसेवितायै नमः
५९१ ओं शिरः स्थितायै नमः
५९२ ओं चंद्रनिभायै नमः
५९३ ओं भालस्थायै नमः
५९४ ओं इंद्रधनुःप्रभायै नमः

५९५ ओं हृदयस्थायै नमः
५९६ ओं रविप्रख्यायै नमः
५९७ ओं त्रिकोणांतरदीपिकायै नमः
५९८ ओं दाक्षायण्यै नमः
५९९ ओं दैत्यहंत्र्यै नमः
६०० ओं दक्षयज्ञविनाशिन्यै नमः
६०१ ओं दरांदोलितदीर्घाक्ष्यै नमः
६०२ ओं दरहासोज्ज्वलन्मुख्यै नमः
६०३ ओं गुरूमूर्त्यै नमः
६०४ ओं गुणनिधये नमः
६०५ ओं गोमात्रे नमः
६०६ ओं गुहजन्मभुवे नमः
६०७ ओं देवेश्यै नमः
६०८ ओं दंडनीतिस्थायै नमः
६०९ ओं दहराकाशरूपिण्यै नमः
६१० ओं प्रतिपन्मुख्यराकांततिथिमंडलपूजतायै नमः
६११ ओं कलात्मिकायै नमः
६१२ ओं कलानाथायै नमः
६१३ ओं काव्यालापविनोदिन्यै नमः
६१४ ओं सचामररमावाणीसव्यदक्षिणसेवितायै नमः
६१५ ओं आदिशक्त्यै नमः
६१६ ओं अमेयायै नमः
६१७ ओं आत्मने नमः
६१८ ओं परमायै नमः
६१९ ओं पावनाकृतये नमः
६२० ओं अनेककोटिब्रह्मांडजनन्यै नमः
६२१ ओं दिव्यविग्रहायै नमः
६२२ ओं क्लींकार्यै नमः
६२३ ओं केवलायै नमः
६२४ ओं गुह्यायै नमः
६२५ ओं कैवल्यपददायिन्यै नमः
६२६ ओं त्रिपुरायै नमः
६२७ ओं त्रिजगद्वंद्यायै नमः
६२८ ओं त्रिमूर्त्यै नमः
६२९ ओं त्रिदशेश्वर्यै नमः
६३० ओं त्र्यक्षर्यै नमः
६३१ ओं दिव्यगंधाढ्यायै नमः
६३२ ओं सिंदूरतिलकांचितायै नमः
६३३ ओं उमायै नमः
६३४ ओं शैलेंद्रतनयायै नमः
६३५ ओं गौर्यै नमः
६३६ ओं गंधर्वसेवितायै नमः
६३७ ओं विश्वगर्भायै नमः
६३८ ओं स्वर्णगर्भायै नमः
६३९ ओं वरदायै नमः
६४० ओं वागधीश्वर्यै नमः
६४१ ओं ध्यानगम्यायै नमः
६४२ ओं अपरिच्छेद्यायै नमः
६४३ ओं ज्ञानदायै नमः
६४४ ओं ज्ञानविग्रहायै नमः
६४५ ओं सर्ववेदांतसंवेद्यायै नमः
६४६ ओं सत्यानंदस्वरूपिण्यै नमः
६४७ ओं लोपामुद्रार्चितायै नमः
६४८ ओं लीलाक्लृप्तब्रह्मांडमंडलायै नमः
६४९ ओं अदृश्यायै नमः
६५० ओं दृश्यरहितायै नमः
६५१ ओं विज्ञात्र्यै नमः
६५२ ओं वेद्यवर्जितायै नमः
६५३ ओं योगिन्यै नमः
६५४ ओं योगदायै नमः
६५५ ओं योग्यायै नमः
६५६ ओं योगानंदायै नमः
६५७ ओं युगंधरायै नमः
६५८ ओं इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिण्यै नमः
६५९ ओं सर्वाधारायै नमः
६६० ओं सुप्रतिष्ठायै नमः
६६१ ओं सदसद्रूपधारिण्यै नमः
६६२ ओं अष्टमूर्त्यै नमः
६६३ ओं अजाजैत्र्यै नमः
६६४ ओं लोकयात्राविधायिन्यै नमः
६६५ ओं एकाकिन्यै नमः
६६६ ओं भूमरूपायै नमः
६६७ ओं निर्द्वैतायै नमः
६६८ ओं द्वैतवर्जितायै नमः
६६९ ओं अन्नदायै नमः
६७० ओं वसुदायै नमः
६७१ ओं वृद्धायै नमः
६७२ ओं ब्रह्मात्मैक्यस्वरूपिण्यै नमः
६७३ ओं बृहत्यै नमः
६७४ ओं ब्राह्मण्यै नमः
६७५ ओं ब्राह्म्यै नमः
६७६ ओं ब्रह्मानंदायै नमः
६७७ ओं बलिप्रियायै नमः
६७८ ओं भाषारूपायै नमः
६७९ ओं बृहत्सेनायै नमः
६८० ओं भावाभावविर्जितायै नमः
६८१ ओं सुखाराध्यायै नमः
६८२ ओं शुभकर्यै नमः
६८३ ओं शोभनायै नमः
६८४ सुलभागत्यै नमः
६८५ ओं राजराजेश्वर्यै नमः
६८६ ओं राज्यदायिन्यै नमः
६८७ ओं राज्यवल्लभायै नमः
६८८ ओं राजत्कृपायै नमः
६८९ ओं राजपीठनिवेशितनिजाश्रितायै नमः
६९० ओं राज्यलक्ष्म्यै नमः

६९१ ओं कोशनाथायै नमः
६९२ ओं चतुरंगबलेश्वर्यै नमः
६९३ ओं साम्राज्यदायिन्यै नमः
६९४ ओं सत्यसंधायै नमः
६९५ ओं सागरमेखलायै नमः
६९६ ओं दीक्षितायै नमः
६९७ ओं दैत्यशमन्यै नमः
६९८ ओं सर्वलोकवशंकर्यै नमः
६९९ ओं सर्वार्थदात्र्यै नमः
७०० ओं सावित्र्यै नमः
७०१ ओं सच्चिदानन्दरूपिण्यै नमः
७०२ ओं देशकालापरिच्छिन्नायै नमः
७०३ ओं सर्वगायै नमः
७०४ ओं सर्वमोहिन्यै नमः
७०५ ओं सरस्वत्यै नमः
७०६ ओं शास्त्रमय्यै नमः
७०७ ओं गुहाम्बायै नमः
७०८ ओं गुह्यरूपिण्यै नमः
७०९ ओं सर्वोपाधिविनिर्मुक्तायै नमः
७१० ओं सदाशिवपतिव्रतायै नमः
७११ ओं सम्प्रदायेश्वर्यै नमः
७१२ ओं साध्व्यै नमः
७१३ ओं गुरूमंडलरूपिण्यै नमः
७१४ ओं कुलोत्तीर्णायै नमः
७१५ ओं भगाराध्यायै नमः
७१६ ओं मायायै नमः
७१७ ओं मधुमत्यै नमः
७१८ ओं मह्यै नमः
७१९ ओं गणांबायै नमः
७२० ओं गुह्यकाराध्यायै नमः
७२१ ओं कोमलांग्यै नमः
७२२ ओं गुरुप्रियायै नमः
७२३ ओं स्वतंत्रायै नमः
७२४ ओं सर्वतंत्रेश्यै नमः
७२५ ओं दक्षिणामूर्तिरूपिण्यै नमः
७२६ ओं सनकादिसमाराध्यायै नमः
७२७ ओं शिवज्ञानप्रदायिन्यै नमः
७२८ ओं चित्कलायै नमः
७२९ ओं आनंदकलिकायै नमः
७३० ओं प्रेमरूपायै नमः
७३१ ओं प्रियंकर्यै नमः
७३२ ओं नामपारायणप्रीतायै नमः
७३३ ओं नंदिविद्यायै नमः
७३४ ओं नटेश्वर्यै नमः
७३५ ओं मिथ्याजगदधिष्ठानायै नमः
७३६ ओं मुक्तिदायै नमः
७३७ ओं मुक्तिरूपिण्यै नमः
७३८ ओं लास्यप्रियायै नमः
७३९ ओं लयकर्यै नमः
७४० ओं लज्जायै नमः
७४१ ओं रंभादिवंदितायै नमः
७४२ ओं भवदावसुधावृष्ट्यै नमः
७४३ ओं पापारण्यदवानलायै नमः
७४४ ओं दौर्भाग्यतूलवातूलायै नमः
७४५ ओं जराध्वांतरविप्रभायै नमः
७४६ ओं भाग्याब्धिचंद्रिकायै नमः
७४७ ओं भक्तचित्तकेकिघनाघनायै नमः
७४८ ओं रोगपर्वतदंभोलये नमः
७४९ ओं मृत्युदारुकुठारिकायै नमः
७५० ओं महेश्वर्यै नमः
७५१ ओं महाकाल्यै नमः
७५२ ओं महाग्रासायै नमः
७५३ ओं महाशनायै नमः
७५४ ओं अपर्णायै नमः
७५५ ओं चंडिकायै नमः
७५६ ओं चंडमुंडासुरनिषूदिन्यै नमः
७५७ ओं क्षराक्षरात्मिकायै नमः
७५८ ओं सर्वलोकेश्यै नमः
७५९ ओं विश्वधारिण्यै नमः
७६० ओं त्रिवर्गदात्र्यै नमः
७६१ ओं सुभगायै नमः
७६२ ओं त्र्यंबकायै नमः
७६३ ओं त्रिगुणात्मिकायै नमः
७६४ ओं स्वर्गापवर्गदायै नमः
७६५ ओं शुद्धायै नमः
७६६ ओं जपापुष्पनिभाकृतये नमः
७६७ ओं ओजोवत्यै नमः
७६८ ओं द्युतिधरायै नमः
७६९ ओं यज्ञप्रियायै नमः
७७० ओं प्रियव्रतायै नमः
७७१ ओं दुराराध्यायै नमः
७७२ ओं दुराधर्षायै नमः
७७३ ओं पाटलीकुसुमप्रियायै नमः
७७४ ओं महत्यै नमः
७७५ ओं मेरुनिलयायै नमः
७७६ ओं मंदारकुसुमप्रियायै नमः
७७७ ओं वीराराध्यायै नमः
७७८ ओं विराड्रूपायै नमः
७७९ ओं विरजायै नमः
७८० ओं विश्वतोमुख्यै नमः
७८१ ओं प्रत्यग्रूपायै नमः
७८२ ओं पराकाशायै नमः
७८३ ओं प्राणदायै नमः
७८४ ओं प्राणरूपिण्यै नमः
७८५ ओं मार्तांडभैरवाराध्यायै नमः
७८६ ओं मंत्रिणीन्यस्तराज्यधुरे नमः

७८७ ओं त्रिपुरेश्यै नमः
७८८ ओं जयत्सेनायै नमः
७८९ ओं निस्त्रैगुण्यायै नमः
७९० ओं परस्यै नमः
७९१ ओं अपरस्यै नमः
७९२ ओं सत्यज्ञानानंदरूपायै नमः
७९३ ओं सामरस्यपरायणायै नमः
७९४ ओं कपर्दिन्यै नमः
७९५ ओं कलामालायै नमः
७९६ ओं कामदुहे नमः
७९७ ओं कामरूपिण्यै नमः
७९८ ओं कलानिधये नमः
७९९ ओं काव्यकलायै नमः
८०० ओं रसज्ञायै नमः
८०१ ओं रसशेवधये नमः
८०२ ओं पुष्टायै नमः
८०३ ओं पुरातनायै नमः
८०४ ओं पूज्यायै नमः
८०५ ओं पुष्करायै नमः
८०६ ओं पुष्करेक्षणायै नमः
८०७ ओं परस्मै ज्योतिषे नमः
८०८ ओं परस्मै धाम्ने नमः
८०९ ओं परमाणवे नमः
८१० ओं परात्परस्यै नमः
८११ ओं पाशहस्तायै नमः
८१२ ओं पाशहंत्र्यै नमः
८१३ ओं परमंत्रविभेदिन्यै नमः
८१४ ओं मूर्तायै नमः
८१५ ओं अमूर्तायै नमः
८१६ ओं नित्यतृप्तायै नमः
८१७ ओं मुनिमानसहंसिकायै नमः
८१८ ओं सत्यव्रतायै नमः
८१९ ओं सत्यरूपायै नमः
८२० ओं सर्वांतर्यामिण्यै नमः
८२१ ओं सत्यै नमः
८२२ ओं ब्रह्माण्यै नमः
८२३ ओं ब्रह्मजनन्यै नमः
८२४ ओं बहुरूपायै नमः
८२५ ओं बुधार्चितायै नमः
८२६ ओं प्रसवित्र्यै नमः
८२७ ओं प्रचंडायै नमः
८२८ ओं आज्ञायै नमः
८२९ ओं प्रतिष्ठायै नमः
८३० ओं प्रकटाकृतये नमः
८३१ ओं प्राणेश्वर्यै नमः
८३२ ओं प्राणादात्र्यै नमः
८३३ ओं पंचाशत्पीठरूपिण्यै नमः
८३४ ओं विश्रृंखलायै नमः
८३५ ओं विविक्तस्थायै नमः
८३६ ओं वीरमात्रे नमः
८३७ ओं वियत्प्रसवे नमः
८३८ ओं मुकुंदायै नमः
८३९ ओं मुक्तिनिलयायै नमः
८४० ओं मूलविग्रहरूपिण्यै नमः
८४१ ओं भावज्ञायै नमः
८४२ ओं भवरोग घ्न्यै नमः
८४३ ओं भवचक्रप्रवर्तिन्यै नमः
८४४ ओं छंदस्सारायै नमः
८४५ ओं शास्त्रसारायै नमः
८४६ ओं मंत्रसारायै नमः
८४७ ओं तलोदर्यै नमः
८४८ ओं उदारकीर्तये नमः
८४९ ओं उद्दामवैभवायै नमः
८५० ओं वर्णरूपिण्यै नमः
मय्या जय लक्ष्मी माता,
तुमुको निशिदिन सेवत,
तुमुको निशिदिन सेवत,
हरविष्णु विधाता
ओं जय लक्ष्मी माता

उमा रमा ब्रह्माणि,
तुही जग माता,
मय्या तुही जग माता,
सूर्य चंद्रमा ध्यावत,
सूर्य चंद्रमा ध्यावत,
नारद रिषि गाता
ओं जय लक्ष्मी माता

दुर्गा रूप निरंजनि,
सुख संपति दाता,
मय्या सुख संपति दाता,
जो कोइ तुमुको ध्यावत,
जो कोइ तुमुको ध्यावत,
रिद्धि सिद्धि धन पाता
ओं जय लक्ष्मी माता

तूहि है पाताळ् निवासिनी,
तुही शुभ दाता,
मय्या तुही शुभ दाता,
कर्म प्रभाव प्रकासिनी,
कर्म प्रभाव प्रकासिनी,
जग निधिकी त्राता
ओं जय लक्ष्मी माता

जिस घरमे तुम रहती,
सब सद गुण आता,
मय्या सब सद गुण आता,
सबसंभव हो जाता
सबसंभव हो जाता ,
मन नहि घबराता
ओं जय लक्ष्मी माता

तुम बिन यग्य न होता,
वस्त्र न हो पाता,
मय्या वस्त्र न हो पाता,
खान पान का वैभव,
खान पान का वैभव,
सब तुम से आता
ओं जय लक्ष्मी माता

शुभ गुण मंदिर सुंदर,
क्षिरोदधि जाता,
मय्या क्षिरोदधि जाता,
रतन चतुर्दस तुम बिन
रतन चतुर्दस तुम बिन
कोइ नहि पाता
ओं जय लक्ष्मी माता

आरति लक्ष्मीजीकी,
जो कोइनर गाता,
मय्य प्रेम सहित गाता
उर अनंद समाता
उर अनंद समाता
पाप उतर जाता
ओं जय लक्ष्मी माता

## Sri Vishnu Sahasranama Stotram

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं.
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये .. १..
यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतं.
विघ्नं निघ्नंति सततं विष्वक्सेनं तमाश्रये .. २..
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषं.
पराशरात्मजं वंदे शुकतातं तपोनिधिम् .. ३..
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे .

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः .. ४..
अविकाराय शुद्धाय नित्याय परमात्मने .
यस्य स्मरणमात्रेण जन्मसंसारबंधनात् .
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे .. ६..
ओं नमो विष्णवे प्रभविष्णवे .

श्रीवैशंपायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः .
युधिष्ठिरः शांतनवं पुनरेवाभ्यभाषत .. ७..

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणं .
स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं .. ८..
को धर्मः सर्वधर्माणां भवतः परमो मतः .
किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात् .. ९..

भीष्म उवाच

जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं .
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः .. १०..
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं .
ध्यायन् स्तुवन्नमस्यंश्च यजमानस्तमेव च .. ११..
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं .
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् .. १२..
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनं .
लोकनाथं महद्भूतं सर्वभूतभवोद्भवं .. १३..
एष मे सर्वधर्माणां धर्मोधिकतमो मतः .
यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा .. १४..
परमं यो महत्तेजः परमं यो महत्तपः .
परमं यो महद्ब्रह्म परमं यः परायणं .. १५..
पवित्राणां पवित्रं यो मंगलानां च मंगलं .
दैवतं दैवतानां च भूतानां योव्ययः पिता .. १६..
यतः सर्वाणि भूतानि भवंत्यादियुगागमे .
यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये .. १७..
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते .
विष्णोर्नामसहस्रं मे शृणु पापभयापहं .. १८..
यानि नामानि गौणानि विख्यातानि महात्मनः .
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये .. १९..
ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ..
छंदोनुष्टुप् तथा देवो भगवान् देवकीसुतः .. २०..
अमृतांशूद्भवो बीजं शक्तिर्देवकिनंदनः .
त्रिसामा हृदयं तस्य शांत्यर्थे विनियुज्यते .. २१..

सदैकरूपरूपाय विष्णवे सर्वजिष्णवे .. ५..

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरं..
अनेकरूप दैत्यांतं नमामि पुरुषोत्तमं .. २२ ..

ओं अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामंत्रस्य ..
श्री वेदव्यासो भगवान् ऋषिः .
अनुष्टुप् छंदः .
श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता .
अमृतांशूद्भवो भानुरिति बीजं.
देवकीनंदनः स्रष्टेति शक्तिः .
उद्भवः क्षोभणो देव इति परमो मंत्रः .
शंखभृन्नंदकी चक्रीति कीलकं .
शाङ्र्गधन्वा गदाधर इत्यस्त्रं .
रथांगपाणिरक्षोभ्य इति नेत्रं.
त्रिसामा सामगः सामेति कवचं .
आनंदं परब्रह्मेति योनिः .
ऋतुः सुदर्शनः काल इति दिग्बंधः ..
श्रीविश्वरूप इति ध्यानं.
श्रीमहाविष्णुप्रीत्यर्थं सहस्रनामजपे विनियोगः ..

{.. अथ ध्यानं .}

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतेमौक्तिकानां
मालाक्लृप्तासनस्थः
स्फटिकमणिनिभैर्मौक्तिकैर्मंडितांगः .
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूष वर्षैः
आनंदी नः पुनीयादरिनलिनगदा शंखपाणिर्मुकुंदः .. १..
भूः पादौ यस्य नाभिर्वियदसुरनिलश्चंद्र सूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः .
अंतःस्थं यस्य विश्वं सुरनरखगगोभोगिगंधर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णुमीशं नमामि .. २..

**ओं नमो भगवतेवासुदेवाय**

ओं शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगं .
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं

वंदे विष्णुं भवभयहरं सर्वलोकैकनाथं .. ३..
मेघश्यामं पीतकौशेयवासं
श्रीवत्सांकं कौस्तुभोद्भासितांगं .
पुण्योपेतं पुंडरीकायताक्षं
विष्णुं वंदे सर्वलोकैकनाथं .. ४..
नमः समस्तभूतानामादिभूताय भूभृते .
अनेकरूपरूपाय विष्णवे प्रभविष्णवे .. ५..
सशंखचक्रं सकिरीटकुंडलं
सपीतवस्त्रं सरसीरुहेक्षणं ।
सहारवक्षःस्थलकौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजं .. ६..
छायायां पारिजातस्य हेमसिंहासनोपरि
आसीनमंबुदश्याममायताक्षमलंकृतं ।
चंद्राननं चतुर्बाहुं श्रीवत्सांकित वक्षसं
रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये .. ७..

{.. हरिः ओं ..}

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः .
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः .. १..
पूतात्मा परमात्मा च मुक्तानां परमा गतिः .
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोक्षर एव च .. २..
योगो योगविदां नेता प्रधानपुरुषेश्वरः .
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः .. ३..
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः .
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः .. ४..
स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः .
अनादिनिधनो धाता विधाता धातुरुत्तमः .. ५..
अप्रमेयो हृषीकेशः पद्मनाभोमरप्रभुः .
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः .. ६..
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः .
प्रभूतस्त्रिककुद्धाम पवित्रं मंगळं परं .. ७..
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः .
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः .. ८..
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः .
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् .. ९..
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः .
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः .. १०..
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः .
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः .. ११..
वसुर्वसुमनाः सत्यः समात्मासम्मितः समः .
अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः .. १२..
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः .
अमृतः शाश्वत स्थाणुर्वरारोहो महातपाः .. १३..
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः .
वेदो वेदविदव्यंगो वेदांगो वेदवित् कविः .. १४..
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः .
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः .. १५..
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः .
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः .. १६..
उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः .
अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः .. १७..
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः .
अतींद्रियो महामायो महोत्साहो महाबलः .. १८..
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः .
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् .. १९..
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः .
अनिरुद्धः सुरानंदो गोविंदो गोविदां पतिः .. २०..
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः .
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः .. २१..
अमृत्युः सर्वदृक् सिंहः संधाता संधिमान् स्थिरः .
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा .. २२..
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः .
निमिषोनिमिषः स्रग्वी वाचस्पतिरुदारधीः .. २३..
अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः .
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् .. २४..
आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः .
अहः संवर्तको वह्निरनिलो धरणीधरः .. २५..
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः .
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः .. २६..
असंख्येयोप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः .
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः .. २७..
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः .
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः .. २८..
सुभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः .
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः .. २९..
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः .

ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः .. ३० ..
अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः .
औषधं जगतः सेतुः सत्यधर्मपराक्रमः .. ३१ ..
भूतभव्यभवन्नाथः पवनः पावनोनलः .
कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः .. ३२ ..
युगादिकृद्युगावर्तो नैकमायो महाशनः .
अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् .. ३३ ..
इष्टोविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः .
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः .. ३४ ..
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः .
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः .. ३५ ..
स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः .
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः .. ३६ ..
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः .
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः .. ३७ ..
पद्मनाभोरविंदाक्षः पद्मगर्भः शरीरभृत् .
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः .. ३८ ..
अतुलः शरभो भीमः समयज्ञो हविर्हरिः .
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः .. ३९ ..
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः .
महीधरो महाभागो वेगवानमिताशनः .. ४० ..
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः .
करणं कारणं कर्ता विकर्ता गहनो गुहः .. ४१ ..
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः .
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः .. ४२ ..
रामो विरामो विरजो मार्गो नेयो नयोनयः .
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः .. ४३ ..
वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः .
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः .. ४४ ..
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः .
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः .. ४५ ..
विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययं .
अर्थोनर्थो महाकोशो महाभोगो महाधनः .. ४६ ..
अनिर्विण्णः स्थविष्ठोभूर्धर्मयूपो महामखः .
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः .. ४७ ..
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः .
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमं .. ४८ ..
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् .
मनोहरो जितक्रोधो वीरबाहुर्विदारणः .. ४९ ..
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् .
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः .. ५० ..
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरं .
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः .. ५१ ..
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः .
आदिदेवो महादेवो देवेशो देवभृद्गुरुः .. ५२ ..
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः .
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः .. ५३ ..
सोमपोमृतपः सोमः पुरुजित्पुरुसत्तमः .
विनयो जयः सत्यसंधो दाशार्हः सात्त्वतांपतिः .. ५४ ..
जीवो विनयिता साक्षी मुकुंदोमितविक्रमः .
अंभोनिधिरनंतात्मा महोदधिशयोंतकः .. ५५ ..
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः .
आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः .. ५६ ..
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः .
त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् .. ५७ ..
महावराहो गोविन्दः सुषेणः कनकांगदी .
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः .. ५८ ..
वेधाः स्वांगोजितः कृष्णो दृढः संकर्षणोच्युतः .
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः .. ५९ ..
भगवान् भगहानंदी वनमाली हलायुधः .
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः .. ६० ..
सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः .
दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः .. ६१ ..
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् .
संन्यासकृच्छमः शांतो निष्ठा शांतिः परायणं .. ६२ ..
शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः .
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः .. ६३ ..
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः .
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः .. ६४ ..
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः .
श्रीधरः श्रीकरः श्रेयः श्रीमा.ण्ल्लोकत्रयाश्रयः .. ६५ ..
स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः .
विजितात्माविधेयात्मा सत्कीर्तिश्छिन्नसंशयः .. ६६ ..
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः .
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः .. ६७ ..
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः .

अनिरुद्धोप्रतिरथः प्रद्युम्नोमितविक्रमः .. ६८..
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः .
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः .. ६९..
कामदेवः कामपालः कामी कांतः कृतागमः .
अनिर्देश्यवपुर्विष्णुर्वीरोनंतो धनंजयः .. ७०..
ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः .
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः .. ७१..
महाक्रमो महाकर्मा महातेजा महोरगः .
महाक्रतुर्महायज्वा महायज्ञो महाहविः .. ७२..
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः .
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः .. ७३..
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः .
वसुप्रदो वासुदेवो वसुर्वसुमना हविः .. ७४..
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः .
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः .. ७५..
भूतावासो वासुदेवः सर्वासुनिलयोनलः .
दर्पहा दर्पदो दृप्तो दुर्धरोथापराजितः .. ७६..
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् .
अनेकमूर्तिरव्यक्तः शतमूर्तिः शतानंअः .. ७७..
एको नैकः सवः कः किं यत् तत्पदमनुत्तमं .
लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः .. ७८..
सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी .
वीरहा विषमः शून्यो घृताशीरचलश्चलः .. ७९..
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् .
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः .. ८०..
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः .
प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः .. ८१..
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः .
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् .. ८२..
समावर्तोनिवृत्तात्मा दुर्जयो दुरतिक्रमः .
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा .. ८३..
शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः .
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः .. ८४..
उद्भवः सुंदरः सुंदो रत्नंआभः सुलोचनः .
अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी .. ८५..
सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः .
महाह्रदो महागर्तो महाभूतो महानिधिः .. ८६..
कुमुदः कुंदरः कुंदः पर्जन्यः पावनोनिलः .
अमृतांशोमृतवपुः सर्वज्ञः सर्वतोमुखः .. ८७..
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः .
न्यग्रोधोदुम्बरोश्वत्थश्चाणूरांध्रनिषूदनः .. ८८..
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः .
अमूर्तिरनघोचिन्त्यो भयकृद्भयनाशनः .. ८९..
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् .
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः .. ९०..
भारभृत् कथितो योगी योगीशः सर्वकामदः .
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः .. ९१..
धनुर्धरो धनुर्वेदो दंडो दमयिता दमः .
अपराजितः सर्वसहो नियंतानियमोयमः .. ९२..
सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः .
अभिप्रायः प्रियार्होर्हः प्रियकृत् प्रीतिवर्धनः .. ९३..
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः .
रविर्विरोचनः सूर्यः सविता रविलोचनः .. ९४..
अनंतो हुतभुग्भोक्ता सुखदो नैकजोग्रजः .
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः .. ९५..
सनात्सनातनतमः कपिलः कपिरव्ययः .
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः
.. ९६..
अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः .
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः .. ९७..
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः .
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः .. ९८..
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्नंआशनः .
वीरहा रक्षणः संतो जीवनः पर्यवस्थितः .. ९९..
अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः .
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः .. १००..
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः .
जनंओ जनजन्मादिर्भीमो भीमपराक्रमः .. १०१..
आधारनिलयोधाता पुष्पहासः प्रजागरः .
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः .. १०२..
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः .
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः .. १०३..
भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः .
यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः .. १०४..
यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः .
यज्ञांतकृद् यज्ञगुह्यमन्नमन्नाद एव च .. १०५..

आत्मयोनिः स्वयंजातो वैखानः सामगायनः .
देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः .. १०६..
शंखभृन्नंदकी चक्री शाङ्र्गधन्वा गदाधरः .
रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः .. १०७..
सर्वप्रहरणायुध ओं नम इति .
वनमाली गदी शाङ्र्गी शंखी चक्री च नंदकी .
श्रीमान् नारायणो विष्णुर्वासुदेवोभिरक्षतु .. १०८..
श्री वासुदेवोभिरक्षतु ओं नम इति .

{.. उत्तरन्यासः..}

भीष्म उवाच

इतीदं कीर्तनीयस्य केशवस्य महात्मनः .
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितं .. १..
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् .
नाशुभं प्राप्नुयात्किंचित्सोमुत्रेह च मानवः .. २..
वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् .
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् .. ३..
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् .
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजां .. ४..
भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः .
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् .. ५..
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च .
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमं .. ६..
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति .
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः .. ७..
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् .
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः .. ८..
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमं .
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः .. ९..
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः .
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनं .. १०..
न वासुदेवभक्तानामशुभं विद्यते क्वचित् .
जन्ममृत्युजराव्याधिभयं नैवोपजायते .. ११..
इमम् स्तवमधीयानः श्रद्धाभक्तिसमन्वितः .
युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः .. १२..
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः .
भवंति कृत पुण्यानां भक्तानां पुरुषोत्तमे .. १३..
द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः .
वासुदेवस्य वीर्येण विधृतानि महात्मनः .. १४..
ससुरासुरगंधर्वं सयक्षोरगराक्षसं .
जगद्वशे वर्ततेदं कृष्णस्य सचराचरं .. १५..
इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः .
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च .. १६..
सर्वागमानामाचारः प्रथमं परिकल्पते .
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः .. १७..
ऋषयः पितरो देवा महाभूतानि धातवः .
जंगमाजण्गमं चेदं जगन्नारायणोद्भवं .. १८..
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च .
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् .. १९..
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः .
त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः .. २०..
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितं .
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च .. २१..
विश्वेश्वरमजं देवं जगतः प्रभुमव्ययं .
भजंति ये पुष्कराक्षं न ते यांति पराभवं .. २२..
न ते यांति पराभवंओं नम इति .

अर्जुन उवाच

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम .
भक्तानामनुरक्तानां त्राता भव जनार्दन .. २३..

श्रीभगवानुवाच

यो मां नामसहस्रेण स्तोतुमिच्छति पांडव .
सोहमेकेन श्लोकेन स्तुत एव न संशयः .. २४..
स्तुत एव न संशय ओं नम इति .

व्यास उवाच

वासनाद्वासुदेवस्य वासितं भुवनत्रयं .
सर्वभूतनिवासोसि वासुदेव नमोस्तु ते .. २५..
श्री वासुदेव नमोस्तुत ओं नम इति .

पार्वत्युवाच

केनोपायेन लघुना विष्णोर्नामसहस्रकं.
पठ्यते पंडितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो .. २६..

ईश्वर उवाच

श्रीराम राम रामेति रमे रामे मनोरमे .
सहस्रनाम तत्तुल्यं राम नाम वरानने .. २७..
श्रीरामनाम वरानन ओं नम इति .

ब्रह्मोवाच

नमोस्त्वनंताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे .

सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः .. २८..
सहस्रकोटी युगधारिणे ओं नम इति .
संजय उवाच
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः .
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम .. २९..
श्रीभगवानुवाच
अनंयाश्चिन्तयंतो मां ये जनाः पर्युपासते .
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं .. ३०..
परित्राणाय साधूनां विनाशाय च दुष्कृतां .
धर्मसंस्थापनार्थाय संभवामि युगे युगे .. ३१..
आर्ताः विषण्णाः शिथिलाश्च भीताः घोरेषु च व्याधिषु वर्तमानाः .
संकीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवंतु .. ३२..
कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् .
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि .. ३३..
{.. इति श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं संपूर्णं ..}

## Sri Lakshmi Ashtottara Shatanama Stotram

देव्युवाच
देवदेव महादेव त्रिकालज्ञ महेश्वर ।
करुणाकर देवेश भक्तानुग्रहकारक ॥ 1॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ।
ईश्वर उवाच
देवि साधु महाभागे महाभाग्यप्रदायकं ।
सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनं ॥ 2॥
सर्वदारिद्र्यशमनं श्रवणाद्भुक्तिमुक्तिदं ।
राजवश्यकरं दिव्यं गुह्याद्गुह्यतमं परं ॥ 3॥
दुर्लभं सर्वदेवानां चतुःषष्टिकलास्पदं ।
पद्मादीनां वरान्तानां विधीनां नित्यदायकं ॥ 4॥
समस्तदेवसंसेव्यमणिमाद्यष्टसिद्धिदं ।
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकं ॥ 5॥
तव प्रीत्याद्य वक्ष्यामि समाहितमनाः श्रृणुं ।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ॥ 6॥
क्लींबीजपदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अंगन्यासः करन्यास स इत्यादिः प्रकीर्तितः ॥ 7॥
ध्यानं
वंदे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषितां ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिः सेवितां
पार्श्वे पंकजशंखपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥ 8॥
सरसिजनयने सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यं ॥ 9॥
प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदां ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकां ॥ 10॥
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधां ।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीं ॥ 11॥
अदितिं च दितिं दीप्तां वसुधां वसुधारिणीं ।
नमामि कमलां कान्तां **क्षमां क्षीरोध संभवां** ॥ 12॥
अनुग्रहपदां बुद्धिमनघां हरिवल्लभां ।
अशोकाममृतां दीप्तां लोकशोकविनाशिनीं ॥ 13॥
नमामि धर्मनिलयां करुणां लोकमातरं ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुंदरीं ॥ 14॥
पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमां ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीं ॥ 15॥
पुण्यगंधां सुप्रसन्नां प्रसादाभिमुखीं प्रभां ।
नमामि चंद्रवदनां चंद्रां चंद्रसहोदरीं ॥ 16॥
चतुर्भुजां चंद्ररूपामिंदिरामिंदुशीतलां ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीं ॥ 17॥
विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीं ।
प्रीतिपुष्करिणीं शांतां शुक्लमाल्यांबरां श्रियं ॥ 18॥
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीं ।
वसुंधरामुदारांगीं हरिणीं हेममालिनीं ॥ 19॥

धनधान्यकरीं सिद्धिं सदा सौम्यां शुभप्रदां ।
नृपवेश्मगतानंदां वरलक्ष्मीं वसुप्रदां ॥ 20॥
शुभां हिरण्यप्राकारां समुद्रतनयां जयां ।
नमामि मंगलां देवीं विष्णुवक्षःस्थलस्थितां ॥ 21॥
विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रितां ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रवहारिणीं ॥ 22॥
नवदुर्गां महाकालीं ब्रह्मविष्णुशिवात्मिकां ।
त्रिकालज्ञानसम्पन्नां नमामि भुवनेश्वरीं ॥ 23॥
लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपांकुरां ।
श्रीमन्मंदकटाक्षलब्धविभवब्रह्मेंद्रगंगाधरां त्वां
त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मुकुंदप्रियां ॥ 24॥
मातर्नमामि कमले कमलायताक्षि
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि लक्ष्मि
प्रसीद सततं नमतां शरण्ये ॥ 25॥
त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेंद्रियः ।
दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोत्ययत्नतः ॥ 26॥
देवीनामसहस्रेषु पुण्यमष्टोत्तरं शतं ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ॥ 27॥
भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकं ।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥ 28॥
दारिद्र्यमोचनं नाम स्तोत्रमम्बापरं शतं ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रितः ॥ 29॥
भुक्त्वा तु विपुलान् भोगानस्याः सायुज्यमाप्नुयात् ।
प्रातःकाले पठेन्नित्यं सर्वदुःखोपशान्तये ।
पठंस्तु चिन्तयेद्देवीं सर्वाभरणभूषितां ॥ 30॥
॥ इति श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रं संपूर्णं ॥

## Suprabhatam

॥ अथ श्री वेंकटेश सुप्रभातं ॥

कौसल्या सुप्रजा राम पूर्वा संध्या प्रवर्तते
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकं ॥ 1

उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडध्वज
उत्तिष्ठ कमलाकांत त्रैलोक्यं मंगलं कुरु ॥ 2

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहरदिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेंकटेशदयिते तव सुप्रभातं ॥ 3

तव सुप्रभातमरविंदलोचने
भवतु प्रसन्नमुखचंद्रमंडले ।
विधिशंकरेन्द्रवनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥ 4

अत्र्यादिसप्तऋषयस्समुपास्य संध्यां
आकाशसिंधुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 5

पंचाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवंति ।
भाषापतिः पठति वासर शुद्धिमारात्
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 6

ईषत्प्रफुल्लसरसीरुहनारिकेल
पूगद्रुमादिसुमनोहरपालिकानां ।
आवाति मंदमनिलस्सह दिव्यगंधैः
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 7

उन्मील्य नेत्रयुगमुत्तम पंजरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केलिशुकाः पठंति
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 8

तंत्रीप्रकर्षमधुरस्वनया विपंच्या
गायत्यनंतचरितं तव नारदोपि ।

भाषासमग्रमसकृत्करचाररम्यं
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 9

भृंगावली च मकरंदरसानुविद्ध
झंकारगीत निनदैःसह सेवनाय ।
निर्यात्युपांतसरसीकमलोदरेभ्यः
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 10

योषागणेन वरदध्निविमथ्यमाने
घोषालयेषु दधिमंथनतीव्रघोषाः ।
रोषात्कलिं विदधतेककुभश्च कुंभाः
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 11

पद्मेशमित्रशतपत्रगतालिवर्गाः
हर्तुं श्रियं कुवलयस्य निजांगलक्ष्म्या ।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषाद्रिशेखरविभो तव सुप्रभातं ॥ 12

श्रीमन्नभीष्ट वरदाखिललोकबंधो
श्रीश्रीनिवास जगदेकदयैकसिंधो ।
श्रीदेवतागृहभुजांतर दिव्य मूर्ते
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 13

श्रीस्वामिपुष्करिणिकाप्लवनिर्मलांगाः
श्रेयोर्थिनो हरविरिंचसनंदनाद्याः ।
द्वारे वसंति वरवेत्रहतोत्तमांगाः
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 14

श्री शेषशैल गरुडाचल वेंकटाद्रि
नारायणाद्रि वृषभाद्रि वृषाद्रि मुख्यां ।
आख्यां त्वदीय वसतेरनिशं वदंति
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 15

सेवापराः शिवसुरेशकृशानुधर्म
रक्षोम्बुनाथ पवमान धनाधिनाथाः ।
बद्धांजलि प्रविलसन्निजशीर्ष देशाः
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 16

घाटीषु ते विहगराज मृगाधिराज-
नागाधिराज गजराज हयाधिराजाः ।
स्वस्वाधिकार महिमाधिकमर्थयंते
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 17

सूर्येंदु भौम बुध वाक्पति काव्य सौरि
स्वर्भानु केतु दिविषत्परिषत्प्रधानाः ।
त्वद्दास दास चरमावधि दासदासाः
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 18

त्वत्पादधूलि भरितस्फुरितोत्तमांगाः
स्वर्गापवर्ग निरपेक्ष निजांतरंगाः ।
कल्पागमाकलनयाकुलतां लभंते
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 19

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयंतः ।
मर्त्या मनुष्यभुवने मतिमाश्रयंते
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 20

श्रीभूमिनायक दयादिगुणाम्रुताब्दे
देवाधिदेव जगदेकशरण्यमूर्ते ।
श्रीमन्ननंत गरुडादिभिरर्चितांघ्रे
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 21

श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुंठ माधव जनार्दन चक्रपाणे ।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 22

कंदर्पदर्प हरसुंदर दिव्यमूर्ते
कांताकुचांबुरुह कुड्मल लोलदृष्टे ।
कल्याणनिर्मलगुणाकर दिव्यकीर्ते
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 23

मीनाकृते कमठ कोल नृसिंह वर्णिन्
स्वामिं परश्वथतपोधन रामचंद्र ।
शेषांशराम यदुनंदन कल्किरूप
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 24

एला लवंग घनसार सुगंधि तीर्थं
दिव्यं वियत्सरिति हेमघटेषु पूर्णं ।
धृत्वाद्य वैदिक शिखामणयः प्रहृष्टाः
तिष्ठंति वेंकटपते तव सुप्रभातं ॥ 25

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयंति निनदैः ककुभो विहंगाः ।
श्रीवैष्णवास्सततमर्थित मंगलास्ते
धामाश्रयंति तव वेंकट सुप्रभातं ॥ 26

ब्रह्मादयः सुरवरास्समहर्षयस्ते
संतस्सनंदन मुखास्त्वथ योगिवर्याः ।
धामांतिके तव हि मंगलवस्तु हस्ताः
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 27

लक्ष्मीनिवास निरवद्यगुणैकसिंधो
संसार सागर समुत्तरणैकसेतो ।
वेदांतवेद्यनिजवैभव भक्तभोग्य
श्रीवेंकटाचलपते तव सुप्रभातं ॥ 28

इत्थं वृषाचलपतेरिह सुप्रभातं
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरंगभाजां
प्रज्ञां परार्थसुलभां परमां प्रसूते ॥ 29

॥ इति वेंकटेश सुप्रभातं ॥

॥ अथ वेंकटेश स्तोत्रं ॥

कमला कुच चूचुक कुंकुमतो
नियतारुणितातुल नीलतनो ।
कमलायतलोचन लोकपते
विजयी भव वेंकटशैलपते ॥ 1

सचतुर्मुखषण्मुखपञ्चमुख
प्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल सारनिधे
परिपालय मां वृषशैलपते ॥ 2

अतिवेलतया तव दुर्विषहै
रनुवेलकृतैरपराधशतैः ।
भरितं त्वरितं वृषशैलपते
परया कृपया परिपाहि हरे ॥ 3

अधिवेंकटशैलमुदारमते
जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः
कमलादयितान्न परं कलये ॥ 4

कलवेणुरवावशगोपवधू
शतकोटिवृतात्स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात्सुखदात्
वसुदेवसुतान्न परं कलये ॥ 5

अभिरामगुणाकर दाशरथे
जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेश विभो
वरदोभव देव दयाजलधे ॥ 6

अवनीतनयाकमनीयकरं
रजनीकरचारुमुखांबुरुहं ।
रजनीचरराजतमोमिहिरं
महनीयमहं रघुराम मये ॥ 7

सुमुखं सुहृदं सुलभं सुखदं
स्वनुजं च सुखायममोघशरं ।

अपहाय रघूद्वहमन्यमहं
न कथंचन कंचन जातु भजे ॥ 8

विना वेंकटेशं न नाथो नाथः
सदा वेंकटेशं स्मरामि स्मरामि ।
हरे वेंकटेश प्रसीद प्रसीद
प्रियं वेंकटेश प्रयच्छ प्रयच्छ ॥ 9

अहं दूरतस्ते पदांभोजयुग्म
प्रणामेच्छयागत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवाफलं त्वं
प्रयच्छ प्रयच्छ प्रभो वेंकटेश ॥ 10

अज्ञानिना मया दोषा
नशेषान्विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं
शेषशैल शिखामणे ॥ 11

॥ इति वेंकटेश स्तोत्रं ॥

॥ अथ वेंकटेश प्रपत्ति ॥

ईशानां जगतोस्य वेंकटपतेः विष्णोः परां प्रेयसीं
तद्वक्षस्स्थल नित्य वासरसिकां तत्क्षांति संवर्धिनीं ।
पद्मालंकृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वंदे जगन्मातरं ॥ 1

श्रीमन् कृपाजलनिधे कृतसर्वलोक
सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।
स्वामिं सुशीलसुलभाश्रितपारिजात
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 2

आनूपुरार्पितसुजातसुगंधिपुष्प
सौरभ्यसौरभकरौ समसन्निवेशौ ।
सौम्यौ सदानुभवनेपि नवानुभाव्यौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 3

सद्योविकासिसमुदित्वरसांद्रराग
सौरभ्यनिर्भरसरोरुहसाम्यवार्तां ।
सम्यक्षु साहसपदेषु विलेखयंतौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 4

रेखामयध्वजसुधाकलशातपत्र
वज्रांकुशांबुरुहकल्पकशंखचक्रैः ।
भव्यैरलंकृततलौ परतत्व चिंहैः
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 5

तांरोदरद्युतिपराजितपद्मरागौ
बाह्यैर्महोभिरभिभूतमहेन्द्रनीलौ ।
उध्यन्नखांशुभिरुदस्तशशांकभासौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 6

सप्रेमभीति कमलाकरपल्लवाभ्यां
संवाहनेपि सपदि क्लममादधानौ ।
कांताववांग्मनसगोचरसौकुमार्यौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 7

लक्ष्मीमहीतदनुरूपनिजानुभाव
नीलादिदिव्यमहिषीकरपल्लवानां ।
आरुण्यसंक्रमणतः किल सांद्ररागौ
श्रीवेंकटेशचरणौ शरणं प्रपद्ये ॥ 8

नित्यान्नमद्विधिशिवादिकिरीटकोटि
प्रत्युप्त दीप्त नवरत्न महःप्ररोहैः ।
नीराजना विधिमुदारमुपादधानौ
श्रीवेंकटेश चरणौ शरणं प्रपद्ये ॥ 9

विष्णोः पदे परम इत्युतिदप्रशंसौ
यौ मध्व उत्स इति भोग्यतयाप्यपात्तौ ।
भूयस्तथेति तव पाणितलप्रदिष्टौ
श्रीवेंकटेश चरणौ शरणं प्रपद्ये ॥ 10

पार्थाय तत्सदृश सारथिना त्वयैव
यौ दर्शितौ स्वचरणौ शरणं व्रजेति ।
भूयोपि मह्यमिहतौ करदर्शितौ ते
श्री वेंकटेश चरणौ शरणं प्रपद्ये ॥ 11

मन्मूर्ध्नि कालियफणे विकटाटवीषु
श्री वेंकटाद्रिशिखरे शिरसि श्रुतीनां ॥
चित्तेप्यनन्यमनसां सममाहितौते
श्रीवेंकटेश चरणौ शरणं प्रपद्ये ॥ 12

अंलानहृष्यदवनीतलकीर्णपुष्पौ
श्रीवेंकटाद्रि शिखराभरणायमानौ ।
आनंदिताखिल मनो नयनौ तवैतौ
श्रीवेंकटेश चरणौ शरणं प्रपद्ये ॥ 13

प्रायः प्रपन्न जनता प्रथमावगाह्यौ
मातुस्स्तनाविव शिशोरमृतायमानौ ।
प्राप्तौपरस्परतुलामतुलांतरौ ते
श्रीवेंकटेश चरणौ शरणं प्रपद्ये ॥ 14

सत्वोत्तरैस्सतत सेव्यपदांबुजेन
संसारतारकदयार्द्र दृगंचलेन ।
सौम्योपयंतृमुनिना मम दर्शितौ ते
श्रीवेंकटेश चरणौ शरणं प्रपद्ये ॥ 15

श्रीश श्रिया घटिकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतयास्फुरंत्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं
स्यां किंकरो वृषगिरीश न जातु मह्यं ॥ 16

॥ इति वेंकटेश प्रपत्ति ॥

॥ अथ वेंकटेश मंगलाशासनं ॥

श्रियः कांताय कल्याण निधये निधयेर्थिनां
श्रीवेंकटनिवासाय श्रीनिवासाय मंगळं ॥ 1

लक्ष्मी सविभ्रमालोक सुभ्रू विभ्रमचक्षुषे
चक्षुषे सर्वलोकानां वेंकटेशाय मंगळं ॥ 2

श्री वेंकटाद्रि शृंगाग्र मंगलाभरणांघ्रये
मंगलानां निवासाय श्रीनिवासाय मंगळं ॥ 3

सर्वावयवसौंदर्य संपदा सर्वचेतसां
सदा सम्मोहनायास्तु वेंकटेशाय मंगळं ॥ 4

नित्याय निरवद्याय सत्यानंदचिदात्मने
सर्वांतरात्मने श्रीमद् वेंकटेशाय मंगळं ॥ 5

स्वतस्सर्वविदे सर्व शक्तये सर्वशेषिणे
सुलभाय सुशीलाया वेंकटेशाय मंगळं ॥ 6

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने
प्रयुंजे परतत्त्वाय वेंकटेशाय मंगळं ॥ 7

आकाल तत्त्वमश्रांतमात्मनामनुपश्यतां
अतृप्त्यमृतरूपाय वेंकटेशाय मंगळं ॥ 8

प्रायस्स्वचरणौ पुंसां शरण्यत्वेन पाणिना
कृपयादिशते श्रीमद् वेंकटेशाय मंगळं ॥ 9

दयामृत तरंगिण्यास्तरंगैरिव शीतलैः
अपांगैः सिंचते विश्वं वेंकटेशाय मंगळं ॥ 10

स्रग्भूषांबरहेतीनां सुषमावह मूर्तये
सर्वार्ति शमनायास्तु वेंकटेशाय मंगळं ॥ 11

श्रीवैकुंठविरक्ताय स्वामिपुष्करिणीतटे
रमया रममाणाय वेंकटेशाय मंगळं ॥ 12

श्रीमद्सुंदरजामातृमुनि मानसवासिने
सर्वलोक निवासाय श्रीनिवासाय मंगळं ॥ 13

मंगलाशासनपरैर्मदाचार्य पुरोगमैः
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मंगळं ॥ 14

॥ इति वेंकटेश मंगलाशासनं ॥

## Sri Mahalakshmi Ashtakam

नमस्तेस्तु महामाये श्रीपीठे सुरपूजिते।
शंखचक्र गदाहस्ते महलक्ष्मि नमोस्तुते।।

नमस्ते गरुडारूढे कोल्हासुर भयंकरि।
सर्वपाप हरेदेवि महलक्ष्मि नमोस्तुते।।

सर्वज्ञे सर्ववरदे सर्व दुष्ट भयंकरि।
सर्वदुःखहरे देवि महालक्ष्मि नमोस्तुते।।

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि ।
मंत्र मूर्ते सदादेवि महलक्ष्मि नमोस्तुते।।

आद्यंत रहिते देवि आदि शक्ति महेश्वरि
योगजे योग संभूते महालक्ष्मि नमोस्तुते।।

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे ।
महापाप हरे देवि महालक्ष्मि नमोस्तुते।।

पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मातः महालक्ष्मि नमोस्तुते।।

श्वेतांबरधरे देवि नानालंकार भूषिते ।
जगत्स्थिते जगन्मातः महालक्ष्मि नमोऽस्तुते।।

महालक्ष्म्यष्टकं स्तोत्रम् यः पठेत् भक्तिमान्नरः।
सर्वसिद्धि मवाप्नोति राज्यम् प्राप्नोति सर्वदा।।

एक काले पठे न्नित्यम् महापाप विनाशनम्।
द्विकालं यः पठेन्नित्यम् धनधान्य समन्वितः।।

त्रिकालम् यः पठे न्नित्यं महाशत्रुविनाशनम्।
महालक्ष्मी र्भवेन्नित्यं प्रसन्ना वरदा शुभा।।

इति महालक्ष्मी अष्टकम्

## Sri AshtaLakshmi Stotram

१. आदिलक्ष्मीः
सुमनसवंदित सुंदरि माधवि, चंद्र सहोदरि हेममये
मुनिगणवंदित मोक्षप्रदायिनि, मंजुलभाषिणि वेदनुते
पंकजवासिनि देवसुपूजित, सद्गुण वर्षिणि शांतियुते.
जयजय हे मधुसूदन कामिनि, आदिलक्ष्मि सदा पालय माम्

२. धान्यलक्ष्मीः
अयिकलि कल्मषनाशिनि कामिनि, वैदिकरूपिणि वेदमये
क्षीरसमुद्भव मंगळरूपिणि, मंत्रनिवासिनि मंत्रनुते
मंगळदायिनि अंबुजवासिनि, देवगणा श्रित पादयुते
जयजय हे मधुसूदन कामिनि, धान्यलक्ष्मि सदा पालय माम्

३. धैर्यलक्ष्मीः
जय वरवर्षिणि वैष्णवि भार्गवि, मंत्रस्वरूपिणि मंत्रमये
सुरगणपूजित शीघ्रफलप्रद, ज्ञानविकासिनि शास्त्रनुते

भवभयहारिणि पापविमोचनि, साधुजनाश्रित पादयुते
जयजय हे मधुसूदन कामिनि धैर्यलक्ष्मि सदा पालय माम्

४. गजलक्ष्मीः
जयजय दुर्गतिनाशिनि कामिनि, सर्वफलप्रद शास्त्रमये
रथगज तुरगपदादि समावृत, परिजन वंदित लोकनुते
हरिहर ब्रह्म सुपूजित सेवित, तापनिवारिणि पादयुते
जयजय हे मधुसूदन कामिनि गजलक्ष्मि रूपेण पालय माम्

५. संतानलक्ष्मीः
अयिखग वाहिनि मोहिनि चक्रिणि, रागविवर्धिनि गानमये
गुणगणवारिधि लोकहितै षिणि, स्वरसप्त भूषित गाननुते
सकल सुरासुर देवमुनीश्वर, मानववंदित पादयुते
जयजय हे मधुसूदन कामिनि, संतानलक्ष्मि सदापालय माम्

६. विजयलक्ष्मीः
जय कमलासनि सद्गतिदायिनि, ज्ञानविकासिनि ज्ञानमये
अनुदिन मर्चित कुंकुमधूपित भूषित वासित वाद्यनुते
कनकधरास्तुति वैभव वंदित, शंकर देशिक मान्य प्रदे
जयजय हे मधुसूदन कामिनि, विजयलक्ष्मि सदा पालय माम्

७. विद्यालक्ष्मीः
प्रणत सुरेश्वरि भारति भार्गवि, शोकविनाशिनि रत्नमये
मणिमयभूषित कर्णविभूषण, शांति समावृत हास्यमुखे
नवनिधि दायिनि कलिमल हारिणि, कामित फलप्रद हस्तयुते
जयजय हे मधुसूदन कामिनि, विद्यालक्ष्मि सदा पालय माम्

८. धनलक्ष्मीः
धिमिधिमि धिंधिमि, धिमिधिमि दिंधिमि, दुंदुभि नाद सुपूर्णमये
घुमघुम घुमघुम घुंघुम, घुंघुम शंखनिनाद सुवाद्यनुते
वेदपुराणेतिहास सुपूजित, वैदिकमार्ग प्रद र्शयुते
जयजय हे मधुसूदन कामिनि, धनलक्ष्मि रूपेण पालय माम्

## Sri Shiva Lingaashtakam
ब्रह्ममुरारि सुरार्चित लिंगं निर्मलभासित शोभित लिंगं।
जन्मजदुःख विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

देवमुनिप्रवरार्चित लिंगं कामदहम् करुणाकर लिंगं।

रावणदर्पविनाशन लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

सर्वसुगन्धिसुलेपित लिंगं बुद्धिविवर्धन कारण लिंगं।
सिद्धसुरासुर वंदित लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

कनकमहामणि भूषित लिंगं फणिपतिवेष्टित शोभित लिंगं।
दक्षसुयज्ञ विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

कुंकुमचंदन लेपित लिंगं पंकजहार सुशोभित लिंगं।
संचितपाप विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

देवगणार्चित सेवित लिंगं भावैर्भक्तिविरेपित लिंगं।
दिनकरकोटि प्रभाकर लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

अष्टदलोपरिवेष्टित लिंगं सर्वसमुद्भव कारण लिंगं।
अष्टदरिद्र विनाशन लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

सुरगुरु सुरवर पूजित लिंगं सुरवन पुष्प सदार्चित लिंगं।
परात्परं परमात्मक लिंगं तत्प्रणमामि सदाशिव लिंगं।। (ओं नमःश्शिवायै ओं नमःश्शिवाय २ )

लिंगाष्टकमिदं पुण्यं यःपठेत् शिव सन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते।।

**कनकधारा स्तोत्रम्**

अङ्गं हरेः पुलकभूषणमाश्रयन्ती भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अङ्गीकृताखिलविभूतिरपाङ्गलीला माङ्गल्यदास्तु मम मङ्गलदेवतायाः।।१।।

मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपा प्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसम्भवायाः ।।२।।

विश्वामरेन्द्र पदविभ्रम दानदक्षमानन्दहेतुरधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धम् इन्दीवरोदरसहोदरमिन्दिरायाः ।।३।।

आमीलिताक्ष मधिगम्यमुदा मुकुन्दमानन्द कन्दमनिमेषम नङ्गतन्त्रम्।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ।।४।।

बाह्वन्तरे मुरजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयाः ।।५।।

कालाम्बुदालि ललितोरसि कैटभारेर्धाराधरे स्फुरति या तडिदङ्गनेव ।
मातुः समस्तजगतां महनीयमूर्तिभद्राणि मे दिशतु भार्गवनन्दनायाः ।।६।।

प्राप्तं पदं प्रथमतः खलु यत् प्रभावात् माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत् तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालयकन्यकायाः ।।७।।

दद्याद् दयानुपवनो द्रविणाम्बुधाराम् अस्मिन्नकिञ्चन विहङ्गशिशौ विषण्णे ।
दुष्कर्म घर्ममपनीय चिराय दूरं नारायणप्रणयिनी नयनाम्बुवाहः ।।८।।

इष्टा विशिष्टमतयोऽपि यया दयार्द्र दृष्ट्या त्रिविष्टपपदं सुलभं भजन्ते ।
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ।।९।।

गीर्देवतेति गरुड्ध्वजसुन्दरीति शाकम्भरीति शशिशेखर वल्लभेति ।
सृष्टिस्थिति प्रलयकेलिषु संस्थितायै तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ।।१०।।

श्रुत्यै नमोऽस्तु शुभकर्म फलप्रसूत्यै रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ।।११।।

नमोऽस्तु नालीकनिभाननायै नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।
नमोऽस्तु सोमामृतसोदरायै नमोऽस्तु नारायणवल्लभायै ।।१२।।

नमोऽस्तु हेमाम्बुजपीठिकायै नमोऽस्तु भूमण्डलनायिकायै ।
नमोऽस्तु देवादिदयापरायै नमोऽस्तु शाङ्र्गायुधवल्लभायै ।।१३।।

नमोऽस्तु देव्यै भृगुनन्दनायै नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै नमोऽस्तु दामोदरवल्लभायै ।।१४।।

नमोऽस्तु कान्त्यै कमलेक्षणायै नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभिरर्चितायै नमोऽस्तु नन्दात्मजवल्लभायै ।।१५।।

सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदाननिरतानि सरोरुहाक्षि ।
त्वद् वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये ।।१६।।

यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसम्पदः ।
सन्तनोति वचनाङ्गमानसैस्त्वां मुरारि हृदयेश्वरीं भजे ।।१७।।

सरसिजनयने सरोजहस्ते धवलतमांशुक गन्धमाल्यशोभे ।

भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।।१८।।

दिग्घस्तिभिः कनककुम्भमुखावसृष्ट स्वर्वाहिनी विमलचारुजलप्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेषलोकाधिनाथ गृहिणीममृताब्धिपुत्रीम् ।।१९।।

कमले कमलाक्षवल्लभे त्वं करुणापूर तरङ्गितैरपाङ्गैः ।
अवलोकय मामकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः ।।२०।।

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतर भाग्यभाजिनो भवन्ति ते भुवि बुध्भाविताशयाः ।।२१।।

कनकधारास्तोत्रं यत् शङ्कराचार्यनिर्मितम् ।
त्रिसन्ध्यं यः पठेन्नित्यं स कुबेरसमो भवेत् ।।२२।।

इति श्रीमत् शङ्कराचार्यविरचितं कनकधारास्तोत्रं सम्पूर्णम् ।।




# KALPANA & KHUSBU JOSHI

Direct: (302) **234-6060** Kalpana Cell: (302) **563-5173**

Khusbu Cell: (302) **690-5616**

Email: kjoshi@psre.com Website: kjoshi.psre.com

*Expert guidance and friendly, attentive service.*
*Let us assist you with your real estate goals.*

Patterson Schwartz REAL ESTATE

Office: 302-239-3000

EQUAL HOUSING OPPORTUNITY REALTOR®





Licensed in DE & PA · Multi-lingual

**BEST WISHES FOR A SUCCESFUL**
2016 SRI MAHA RUDRA, SHAKTI YAGNAM
Koti Kum Kum Archana

S I *SAVIO INSTITUTE for Learning*

# SAVIO INSTITUTE

**1000 Old Lancaster Pike, Hockessin, DE 19707**
**(located in Hockessin Montessori School)**

**WWW.SAVIOINSTITUTE.COM**

**Contact: Surya Chitra - 302-897-6319**

## *COLLEGE PREP*

## *AP & SAT II Subject Test Prep*

**Biology Calculus Chemistry History Math Physics**

## *For High School Test Prep*

**Grades 5 through 8**

## *BETTER THAN JUST MATH!*

**MATH** (All Levels + Math League/Counts, ...)

**READING** (Critical Reading & Vocab)

**WRITING** (Grammar & Essay Writing)